अथधर्म्मप्रबोधिनीप्रारभ्यते

श्रीगणेशायनमः॥ कृत्वाकरसंपुटकंकमलेशंकमलभुवंकप
र्द्दिनं॥ मित्रंकोकनदानांवन्देकरितुण्डमोममेव॥१॥ धर्मशास्त्री
यग्रन्थेभ्यःसंग्रहीत्वाऽन्यतोपिच॥ वृंदावनेनविदुषाकृताधर्म
प्रबोधिनी॥२॥ अथतिथिभेदाः॥ चंद्रमसःषोडशकलानांमध्ये
यावदेकस्यांकलायांचन्द्रःस्थितोभवतितावदेकातिथिः। द्वितीया
यांद्वितीयातृतीयायांतृतीयाएवमुत्तरोत्तरमूह्यम् सातिथिर्द्वि
धाअखण्डाखण्डाच अखण्डातिथिरुदयादारभ्यदिनार्द्धव्यापि
नीखण्डातुउदयादारभ्यदिनार्द्धव्यापिनीयानस्यात्सा।खण्डा
यांव्रतप्रारम्भंसमाप्तिञ्चनकुर्य्यात् अखण्डायांतुकुर्यात्॥ अथ
पारणम्॥ तिथिनक्षत्रनियमेतिथिभान्तेचपारणंअतोऽन्यथा
पारणेतुव्रतभङ्गमवाप्नुयात्॥ भान्तेकुर्य्यात्तिथेर्वापिशस्तंभारत
पारणम्॥ याःकाश्चित्तिथयःप्रोक्ताःपुण्यानक्षत्रसंयुताः। ऋ-
क्षान्तेपारणंकुर्याद्विनाश्रवणरोहिणी॥ तिथ्यृक्षयोर्यदाछेदोन
क्षत्रान्तमथापिवा अर्द्धरात्रेऽथवाकुर्यात्पारणंत्वपरेऽहनि॥
सर्वेष्वेवोपवासेषुदिवापारणमिष्यते। तिथ्यन्तेचोत्सवान्तेवा
व्रतीकुर्वीतपारणं। पारणंनामपारंयातिकर्म्मत्वेनसमाप्त्यर्थ-
त्वादिति॥ सात्वस्तमयपर्य्यन्तव्यापिनीचेत्परेऽहनि॥ दिवैवपा
रणंकुर्यात् पारणेनैवदोषभाक्॥ अथमुहूर्त्तस्वरूपं॥ अक्षिपक्ष्म
परिक्षेपोनिमेषःपरिकीर्तितः॥ द्वौनिमेषौत्रुटिर्नामद्वेत्रुटीतुलवः
स्मृतः॥ द्वौलवौक्षणइत्युक्तःकाष्ठाप्रोक्तादशक्षणैः। त्रिंशत्का
ष्ठाकलाप्रोक्ताकलात्रिंशन्मुहूर्त्तकः॥ तेतुत्रिंशदहोरात्रइत्याह
भगवान्हरिः॥ अथतिथिनिर्णयः॥ प्रतिपत् दुर्गास्थापनेसर्वा
मध्याये पर्वतपूजने कार्त्तिकशुक्लद्यूतेसकलकृष्णपक्षेचपरा
सकलशुक्लपक्षे गोश्रृंगारक्रीडायाञ्चपूर्व्वाग्राह्या॥ द्विती या

ऊर्ज्जे सिते पूर्वदिने मध्यान्हे नो चेत् परा इतरास्तु सर्वाः परा ग्रा-
ह्याः॥ तृतीया। माघसिते रंभा श्रावणसिते मधुश्राविणी। चैत्रसिते
चन्दनिका। राधसिते ऽक्षया। भाद्रकृष्णे कज्जली च परा तदन्या
श्चोदयगाः भाद्रसिते हरितालिका। परदिने द्विघटि चेत् पूर्व्वा
ग्राह्या॥ चतुर्थी। कार्त्तिककृष्णे चतुर्थी यद्दिनद्वये चन्द्रोदयगा
तदा पूर्वा नो चेत्सन्निहितेन्दूदया। नभसः कृष्णे पूर्वैव। माघकृष्णे प-
रैव एतदतिरिक्ताः कृष्णे याश्चतुर्थ्यः ता दिनद्वये चन्द्रोदयगा नो
चेत् परा भाद्रसिते मध्यान्हे चेत् पूर्वा नो चेत् परा माघसिते सायंग-
ता जेष्टश्रावणयोरुदयगा ग्राह्या॥ पञ्चमी आश्विनशुक्ले पूर्व्व-
विद्धा भाद्रमाघमार्गश्रावणसितेषु परा कृष्णे तु सर्वेषु पूर्व्वविद्धैव
ग्राह्या॥ षष्ठी। षष्ठ्यस्तूदयगाः सर्व्वाः भाद्रसिते वैधृतियुता मार्गसि-
ते रवियुता रम्या नाम्नी भवति स्कन्दस्य षष्ठी पूर्वैव चन्द्रषष्ठी रविच-
न्द्रसहिता ग्राह्या॥ सप्तमी। सप्तम्यः पूर्व्वा माघपौषयोस्तु सिते परा। रा-
धसिते मध्यान्हव्यापिनी॥ अष्टमी। कृष्णाष्टमी निशीथे चेत् स्मा-
र्त्तैर्गृह्यते वैष्णवैस्तु निशीथे बुधरोहिणीयुता सप्तम्यविद्धा गृह्यते
कैश्चित्तु उदयगा रोहिणी गृह्यते कैश्चित्तु आश्विनकृष्णे सिंहस्थे सू-
र्यश्चेत्तदेव गृह्यते भाद्रसिते मार्गकृष्णे पूर्व्वा वृषसिते परा मुहूर्त्त-
त्रयानो चेत् पूर्व्वा इतरादिनाड्योत्तरा ग्राह्याः॥ नवमी। रामनवमी
पूर्व्वा दुर्गानवमीद्वयं तु परं अक्षयाख्या परा अन्याः पूर्वा॥ दशमी
दशम्यः सिते पराः कृष्णे पूर्वाः ज्येष्ठसिते चेत् हस्तयुता शुभा
भवति विजयाख्या प्रदोषगा सश्रवणा चेत् याने शुभा॥ एका-
दशी सूदयगां षष्टिघटीतो वृद्धां चेत् परां वृद्धामपि क्षयंगतां गृ-
हस्थाः कुर्व्वन्ति परे तु तत्पूर्वदिने षट्पञ्चाशद्घटीमिता दश-
मी चेत् द्वादशीं अपरे तु तत्पूर्वदिने निशीथे दशमीविद्धा चेत् के-
वलं द्वादशीं कुर्वन्ति एकादशी उदयाकार्या दिनद्वये चेत् परा
परदिनाभावे पूर्व्वा दशमीविद्धापि गृहस्थाः कुर्व्वंति वैष्णवा-
स्तु पूर्व्वदिने षट्पञ्चाशद्घटी दशमी चेत् एकादशीं त्यक्त्वा द्वा-

दशींकुर्व्वन्ति अन्येतु निशीथेदशमी विद्धाचेत्तांत्यक्त्वाद्वादशींकु
र्व्वन्ति॥ द्वादशी। वामनद्वादशी पूर्व्वाश्रवणयुतावा इतरास्तु परा
ग्राह्याः॥ त्रयोदशी। त्रयोदशी प्रदोषकालगायुग्मे सति कृष्णे परा
सितेपूर्व्वा चैत्रसिते पूर्व्वाद्वयं चन्द्र शनि युक् प्रदोषव्रते शुभाऽ
माघसितेरम्भाख्या भाद्रसितेस्मराख्या द्वादशी विद्धा ऊर्जसिते
सायंगताग्राह्या चैत्रकृष्णे शतभिषामन्दशुभयुक् वारुणीभव
ति॥ चतुर्द्दशी। सितेपरा कृष्णे पूर्वाराधसिताप्रदोषगा अनंताख्या
तु परस्मिन् त्रिमुहूर्त्तमिता चेत् परा नोचेत् पूर्व्वापरैस्तु मध्या
न्हगोक्ता प्रदोषव्रतेतु सायङ्गता शिवरात्रव्रते निशीथगा दिनद्व
ये तादृशी चेदन्याहनुमतोप्येवं नरकाख्यातु पूर्व्वा वैकुंठाख्या
परा॥ पूर्णिमा। होलिकादहनं निशि भद्रान्ते कार्य्यम् दिनद्वयेचेत्
भद्रारहितानिट् तदा पूर्व्वस्यां दिनद्वयेनोचेत् तदा भद्रपुच्छेश्राव
णीतु भद्रारहिता यदा तदा रक्षाबंधनं कार्यं पूर्व्वाचग्राह्या॥ अथा
मावास्या॥ अमातु कुशखनने परा व्रते पूर्व्वा ऊर्जकृष्णे सायङ्ग
ता वटसावित्रीतु मध्यान्हव्यापिनी चेत् परा अन्याश्च पराःस्युः
॥ अथान्यदपि अमावास्यानिर्णयः॥ श्राद्धार्थे दिनस्य पंचविभा
गाः॥ एकैकभागेत्रयो मुहूर्त्ता भवंति ते तु भागाः प्रातः। पूर्वान्हः।
मध्यान्हः। अपरान्हः। सायान्हः। इति अष्टमो मुहूर्त्तः कुतुपः नवमो रौहिणः
दशमो विरंचः॥ इति कुतुप रौहिण विरंचानां कुतुपसंज्ञापि उच्य
ते इति॥ अमावास्या अपरान्हव्यापिनी ग्राह्या। दिनद्वये अपरा
न्हव्यापिनी चेत् परैवस्यात् एषु पक्षेषु कुतुपारब्धश्राद्धस्य अ
परान्हे समाप्तौ अपि न दोषः नोभयत्रापरान्हव्यापिन्यांतु परदि
नेकुतुपमारभ्य रौहिणांतं कुर्यात्॥ अमावत्पूर्णिमाश्राद्धेः स्ति
सांवत्सरे अपरान्हव्यापिन्येव तिथिर्ग्राह्या। दिनद्वये अपरान्हसत्वे
तु अधिका अपरान्हव्यापिनी ग्राह्या॥ उभयत्र अपरान्हस्पर्शाऽ
भावेतु तिथिक्षयश्चेत् पूर्वा त्रिमुहूर्तव्यापिनी तत्र श्राद्धंतु कुतु
पे एवस्यात् वृद्धिसाम्ये चेत् परा ग्राह्या दर्शे महालये च मृतस्य स

पपितृव्यतत्पुत्रपौत्राणाञ्चैकरात्रं अथविवाहिता चेत् पतिंत्य
क्त्वाऽन्यमाश्रिता सूयेन्मृयेत् न तज्जारस्यैव त्र्यहं पूर्व्वपत्यादीनां
नाशौचमिति अनुपनीतस्य अनूढकन्यायाश्च मातापितृमर
णे त्रिरात्रं अन्यमरणे तु न किमपि विवाहोत्तरं कन्यायाः पितृगेहे
मरणे मातापित्रोः सापत्नभ्रातुः सोदरभ्रातुश्च त्रिरात्रं पितृव्यादी
नां तद्गृहवर्त्तिनां सपिण्डानामेकाहः पतिगेहे मरणे पित्रोः साप
त्नमातुश्च त्रिरात्रं भ्रातुः पक्षिणी अन्येषामेकाहः मातापित्रोः साप
त्नमातुर्मरणे विवाहितायाः कन्यायास्त्रिरात्रं दशाहान्ते दशाहो
र्ध्वं कालान्तरेपि पक्षिणी ग्रामान्तरे त्वेकाहः एवं सापत्नेभ्रातृभगि
न्योरपि एवं भगिनीमृतौ भगिन्या अपि विवाहितायाः कन्यायाः
मातामहाद्यपितृव्यादिमरणे स्नानमेव अनुपनीतभ्रातृमरणे भ
गिन्या नाशौचं। अथबन्धुमरणाशौचं। आत्मपितृष्वसुः पुत्रा आ
त्ममातृष्वसुः सुताः आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः
॥ पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः पितुर्मातुलपुत्रा
श्च विज्ञेयाः पितृबान्धवाः मातुः पितृष्वसुः पुत्राः मातुर्मातृष्वसुः
सुताः। मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः॥ एषामुपनीते
पक्षिणी अनुपनीते एकाहः स्वगृहे मरणे तु त्रिरात्रं पितृष्वस्रादि
कन्यानां विवाहितानामेकाहः नोचेत् स्नानमात्रं मातुल — मरणे
भगिनीपुत्रस्य भगिनीकन्यायाश्च पक्षिणी उपकारकमातुल
मरणे स्वगृहे मातुलमरणे च त्रिरात्रं अनुपनीतमातुलमरणे
ग्रामान्तरे वा एकरात्रं एवं सापत्नमातुलमरणेपि एवं मातुला
नीमरणेपि सापत्नमातुलानीमरणे नाशौचं उपनीतभागिनेय
मरणे मातुलस्य मातुलभगिन्याश्च त्रिरात्रं एवं सापत्नभागिनेय
मृतेऽपि अनुपनीतस्य मातुलमातुलभगिन्याश्च पक्षिणी एवं सा
पत्नभागिनेयेपि भागिनेयीमरणे तु स्नानमात्रं मातामहमरणे
दुहितृपत्यस्य कन्यापुत्रस्य त्रिरात्रं ग्रामान्तरे पक्षिणी माता
मह्यां मृतायां दौहित्रस्य दौहि[illegible]पक्षिणी उपनीतदौहित्रमर

णे मातामहस्य मातामह्याश्च त्रिरात्रं अनुपनीते पक्षिणी दौहि—
त्री मरणे नाशौचं श्वश्रूश्वशुरयोर्मरणे जामातुः सन्निधौ त्रिरात्रं अ
सन्निधौ पक्षिणी उपकारकयोरसंन्निधावपि त्रिरात्रं ग्रामान्तरे ए
करात्रं भार्यामरणेन निवृत्तसंबन्धयोश्वश्रूश्वशुरयोरनुपकारक
योर्मरणे तु जामातुरेकाहः जामातरि मृते श्वश्रूश्वशुरयोरेकरात्रं
स्नानाच्छुद्धिर्वा स्वगृहमरणे त्रिरात्रं उपनीतश्यालके मृते भगि॰
नी भर्तुरेकाहः अनुपनीते स्नानमात्रं ग्रामान्तरे मृतेपि स्नानमेव
भार्यामरणेन निवृत्तसम्बन्धश्यालके मृतेपि स्नानं शालकसुतम
रणे स्नानं केचित् शालिकायां मृतायामेकमहः। मातुः स्वसरि मृ
तायां स्वस्वपत्ययोः कन्यापुत्रयोः पक्षिणी एवं सापत्नमातुः स्वसृ
मरणेपि पितुः स्वसरि मृतायां कन्यापुत्रयोः भ्रातृपत्ययोः पक्षि॰
णी पितुः सापत्नस्वसृ मरणे तु स्नानमात्रं भ्रातृपत्यमरणे तु पि
तृष्वसुः स्नानं स्वगृहे पितृस्वसृमातृष्वसृमरणे त्र्यहम् बन्धुना
दाहे तु त्रिरात्रम्। बन्धुगृहे वासकस्य तदन्नभोजकस्य बन्धुदाहे
दशाहादि बन्धूनामाशौचं पितृस्वस्रादि कन्याभिस्तु बन्धुत्रयं
मरणे स्नानमात्रं कार्य्यं बन्धुनवकमध्य आत्मबन्धुत्रये परस्पर
माशौचम् अवशिष्टबन्धुषट्के तु बन्धुषट्कमरणे देवदत्तस्य
आशौचं भवति देवदत्तस्य मरणे बन्धुषट्कस्य नाशौचम् इति॥
॥ अथ दत्तकपुत्रस्याशौचम्॥ पंचवर्षाधिकस्य बालस्य दत्तकत्वं
न स्यात् अनुपनीतस्य दत्तकस्य मरणे पूर्वापरपित्रोस्त्रिरात्रं सपिं
डानामेकाहः उपनीतस्य दत्तकस्य मरणे पालकपित्रादिसपिंडा
नां दशाहादि पूर्व्वपित्रोस्त्रिरात्रं सपिंडानामेकाहः दत्तकेनापि
पूर्व्वापरपित्रोर्मृतौ त्रिरात्रं पूर्व्वापरसपिण्डानां मरणे एकाहः पि
त्रोः और्ध्वदैहिककरणे तु कर्मांगं दशाहमेव पूर्व्व पित्रोः पालक
पित्रोर्वा दत्तकस्य पुत्रपौत्रादेर्जनने मरणे वा पूर्व्वापरसपिण्डाना
मेकाहः एवं पूर्वापरसपिण्डमरणादौ अपि दत्तकपुत्रपौत्रादेरपि
एकाहः इदं सपिण्डसमानोदकभिन्ने दत्तीकृते बोध्यं सगोत्रस

पिण्डे सोदके च दत्ती कृते यथाक्रमं दशाहं त्रिरात्रञ्च यथाप्राप्तं भवत्येवइति॥ अथ विदेशस्थाशौचम्॥ अशौचकालाभ्यन्तरे सपिंडविपत्तिश्रवणं चेत् अवशिष्टकालमशौचं भवति यदि तु सम्पूर्णाशौचकालेऽतीते षण्मासाभ्यन्तरे श्रवणं स्यात्तदा त्रिरात्रं ततऊर्ध्वं नवममासपर्यन्तं पक्षिणी नतऊर्ध्वं वर्षपर्यन्तमहोरात्रं वर्षानन्तरं स्नानोदकदानेन शुद्धिः त्रिरात्राद्यशौचकाले व्यतीते सति श्रवणे शौचाभावः स्नानेन शुद्धिः देशान्तरश्रवणे तु सद्यः शौचं भाषाभेदे न महानद्या पर्वतेन वा व्यवहितो देशो देशांतरं नदीपर्वताभावे तु विंशत्यधिकशतक्रोशानन्तरमपि देशो देशान्तरं इदमाशौचं उपनीतानामेव स्त्रीशूद्राणान्तु विवाहितानामेवास्ति शूद्रस्य षोडशवर्षपर्यन्तं विवाहकालः अथ मातापितृविपत्ति(श्र)वणं चेत्तदा यस्मिन्दिने श्रुतं तत आरभ्य दशाहादिकमेव नियमेन सर्वदाशौचं भवति सपत्न्योर्मिथः स्त्रीपुरुषयोश्च मिथः एवं देशांतरे कालांतरे च हीनवर्णायामातृसपत्न्या विपत्तिश्रवणे तु वर्षानन्तरं पुत्रस्य त्रिरात्रमाशौचं जननाशौचकाले व्यतीते तु श्रवणे नाशौचं पितुः स्नानमात्रं विवाहिता कन्यायाः पित्रोर्मरणे त्रिरात्रेतिक्रान्तेपि दशाहान्तस्त्र्यहं तदूर्ध्वं वत्सरांतरेपि पक्षिणी औरसपुत्रमृतौ मातापित्रोर्वत्सरान्तरेपि त्रिरात्रम् अपूर्णद्विवर्षयोः कन्यापुत्रयोः भूमिखननन्तु दशगात्रं द्विवर्षादारभ्य कन्यापुत्रयोः दाहे दशगात्रमात्रं कन्यायाः विवाहपर्यन्तं पुत्रस्य षडब्दपर्यन्तं ततउपनयनपर्यन्तमेकादशाहश्राद्धं यज्ञोपवीतात्सपिण्डनं अपूर्णद्विवर्षस्य दाहे सति दशगात्रम्॥ अतिक्रान्ताशौचं वयोऽवस्थाशौचं च सर्ववर्णसाधारणं आहिताग्नेर्विदेशमरणे मन्त्रवद्दाहात्पूर्व्वं पुत्रादीनामाशौचं संध्यादिनित्यकर्मलोपश्च नास्ति॥ अनाहिताग्नेर्मरणदिनादारभ्य पुत्रादिभिराशौचं कार्यं अनाहिताग्नेरस्थिदाहपर्णशरदाहयोस्तु पूर्वमगृहीताशौचयोर्भार्यापुत्रयोर्दशाहमेव गृहीताशौचयोस्तु संस्कारकर्तृभिन्नयो

दाहकाले त्रिरात्रं सापत्न्योर्मिथश्चैवं पत्नीसंस्कारेपत्युश्चैवं एतद्भिन्नसपिंडानां तु पूर्वमगृहीताशौचानामनाहिताग्निसंस्कारकाले त्रिरात्रं। गृहीताशौचानां तु सपिंडानां दाहकाले स्नानमात्रं दूर्दं सपिण्डानां त्रिरात्रादिकं पुत्रादेर्दशाहादिकञ्च दशाहोर्ध्वं संस्कारकरणे ज्ञेयं। दशाहमध्ये संस्कारकरणे तु शेषदिनैरेव शुद्धिः कर्म्मसमाप्तिश्च आहिताग्नेरेव दशाहमध्ये पिशारीरदाहे पर्णशरदाहे वा शेषेण शुद्धिः समंत्रकदाहदिनस्यैव प्रथमदिनत्वात् दशाहोर्ध्वं देशांतरमृतानानाहिताग्निवार्ताश्रवणादिना कृतत्रिरात्राशौचानां सपिंडानां चतुर्थादिदिनेषु संस्कारारंभे दाहकाले स्नानं अगृहीताशौचानां त्रिदिनमेव भार्यापुत्रादेः श्रवणदिनाद्दारभ्य दशाहं द्वितीयेन्हि आरंभे चतुर्थे दिने सपिंड शुद्धिः देशांतरगतस्य द्वादशवर्षादि प्रतीक्षोत्तरं पर्णशरदाहेप्येवमेव यदारभ्यवार्त्ता न श्रूयते तदारभ्य पूर्ववयसि विंशतिमध्ये पंचदशउत्तरे वयसि द्वादशप्रतीक्ष्य मरणनिश्चयासम्भवे कार्या इति। चान्द्रायणत्रयं कृत्वा त्रिंशत् कृच्छ्राणि वा कृत्वा दाहयेत्। अथ अशौचसंस्कारः॥ श्राद्धादिकृते जीवन्यदि समागच्छेत्तदाघृतकुंभे निधाय जातकर्मादि संस्कारान् कुर्य्यात् जननाशौचं मध्ये द्वितीयं मरणाशौचं चेदापतेत् तदा मरणाशौचकालव्यतिगमेन शुद्धिः मरणे वा जननाशौचपतने मरणाशौचव्यतिगमेन शुद्धिः सम्पूर्णजननाशौचमध्ये सकलाशौचकालार्द्धभागात्पूर्वं यदि सकलजननाशौचान्तरस्य निपातः स्यात्तदा पूर्व्वाशौचव्यतिगमेन शुद्धिः अर्द्धभागात्परतो निपाते तूत्तरेणैव शुद्धिः अन्तिमदिने सकलाशौचनिपाते तु अन्त्यदिनं समाप्य पश्चाद्दिनद्वयेन शुद्धिः अन्तिमे व्यतीते प्रभातात् प्राक् श्रवणे तु दिनत्रयेण शुद्धिः। तस्मिन्वर्द्धिते द्व्यहे त्र्यहे वाशौचान्तरस्य संपूर्णस्य निपातश्चेत्तदोत्तरेणैव शुद्धिः सकलमरणाशौचे सकलमरणाशौचान्तरस्य निपाते प्येवमेव अ संपूर्णाशौचे यद्यपूर्णाशौचनिपातस्तदोत्तरेणैव शुद्धिः

असंपूर्णानांविषमकालव्यापकानांमेलनेतुबहुदिनव्यापकेनशु
द्धिः अत्रचप्रबलेनदुर्बलंनिवर्ततेबहुदिनव्यापकंप्रबलंजनन
मरणयोर्मध्येमरणाशौचंप्रबलंमात्राशौचमध्येपित्राशौच
निपातश्चेत्पित्राशौचंसर्व्वकार्य्यंपित्राशौचेमात्राशौचनि
पातेतुपित्राशौचंसमाप्यपक्षिणीकुर्यात्स्त्रीणांतुप्रसवनिमि
त्ताशौचंकेनापिप्रबलेननिवर्तते अतःपुत्रेजातेविंशतिरात्रं
कंन्यायांमासंतुमर्यासंनियमेनाशुद्धिर्भवति मृताशौचेजाताशौचे
वापुत्रजननेजातकर्मादिप्रतिबन्धोनास्तीत्येके पूर्वाशौचान्तेजात
कर्मेत्यन्ये। मातुर्याधिका पक्षिणी तन्मध्येपितुर्मर्हेकोद्दिष्टश्राद्धवृ
षोत्सर्गशय्यादानादिकञ्चकुर्यात् अन्यसपिण्डाशौचेत्वेकाद
शाहकृत्यं नकार्यमितिवहवःकार्यमितिकश्चित्तूइति॥ ॥अथ
मृत्युविषाशौचं॥ वृद्धःकर्म्माशक्तोवैद्यानिवृत्तरोगश्चपुमान् य
दिजलाग्निभृगुपतनमहापथगमनहिमालयगमनप्रयाणव
टशाखाग्रपतनानशनैःप्रायश्चित्तैर्देहंत्यजतितदातस्यत्रिरात्रमा
शौचं।एतत्प्रायश्चित्तकरणकालेपिजीवतांजीवानांपुनर्मरणेच
त्रिरात्रंरोषादिनामृतस्त्वात्मघातीस्यात्तस्याशौचमग्निदानो
दकदानानिनसंति।प्रमादेनमृतस्यतुसर्व्वंकार्यंदशाहाद्यशौचं
॥अथगोब्राह्मणार्थंयुद्धेचदंडेनमृतानामेकरात्रंसंमर्देननिः
शस्त्रकलहेनराज्ञाचहतानांसंग्रामेसंमुखहतानांगोब्राह्म
णार्थेचजलपंकादौहतानांसद्यःशौचं।मरणांतिकप्रायश्चित्तेच्छू
नांपुंसांदैवात्जलेनाग्निनारज्वाभृगुप्रपातेनशस्त्रेणनखायु
धभल्लूकादिभिः सर्पवराहादिभिर्वाविद्युतावामृतानांसद्यःशौ
चे।यस्यचपुंसोराजाशुद्धिमिच्छतितस्यापि सद्यःशौचं।प्रमादेन
भल्लूकसर्पवराहादिभिर्हतानांसकलंप्रमादेनतडिताहतस्यत्रि
रात्रं।लगुडादिनापराङ्मुखहतस्यत्रिरात्रं।कारागारेचौरादिमृता
नामेकरात्रं।अथचेद्गुरौमृतेशिष्यःसंस्कारंकुर्वीततस्यदश
हंभवतिदाहंनकुर्याच्चेदहोरात्रं।स्वगृहेमृतेत्रिरात्रं।गुरुपत्न्यां

चैकरात्रं गुरुपुत्रे चतुरोयामान्। स्वगृहस्थशिष्यस्य विपत्तौ गु
रोरेकाहोरात्रं। सहाध्यायिनि मृते एकरात्रं। मित्रे विपन्ने स्वगृहे
पक्षिणी। अन्यत्राहोरात्रं। इदमाशौचं आहिताग्नेर्दाहदिनमारभ्य
अनाहिताग्नेर्मरणदिनमारभ्य वेदितव्यम्। इति॥ अथ दहनवह
नाशौचं॥ धर्मबुद्ध्या यो ब्राह्मणोऽनाथब्राह्मणं प्रेतं दहति वहति वा
स स्नात्वा शुचिर्भवति। अवरं वरो यदि दहति अधमो वा उत्तमं दहति
तदा प्रेतजातितुल्यमाशौचं भवति अथ चेत्सजातीयं मूल्येन द
हति तदापि प्रेतजात्युक्तं भवति यदि स्नेहेन सजातीयं दहति तदा
नैशिकी। यदि शिष्यः परद्वारा द्रव्यं दत्वा गुरुं दाहयति तदा शिष्य
स्य दशाहं भवति। यस्य बन्धोर्मरणे किञ्चिदशौचमुक्तं तस्य दा
हे कृते सति दाहकस्य त्रिरात्रं यस्तु किञ्चिदशौचभागी दाहादि
कृत्वा अकृत्वा वा मृतसंबन्धिगृहे वसति अथवा तदन्नं भुंक्ते तस्य
त्रिरात्रं यस्तु भयं करोति तस्य प्रेतजात्युक्तं भवति। प्रमादेन भुंक्ते
नाशौचं शवानुगमने सर्व्वेषामेकाहोरात्रं इति॥ अथ मृतदोषतः
॥ शास्त्रानुज्ञां विना शस्त्राग्निविषजलपाषाणभृगुपातानशना
दिभिः स्वेच्छयात्मघातकानां क्रोधात्सरोहेशेन वा स्तक्स्वत एवे
ष्टसाधनताभ्रमेण वा चौर्यादिदोषे राजहतानां पारदार्येतत्पत्या
दिहतानां विद्युद्धतानां गवां नदीतरणवृक्षारोहकूपावरोह गवा
दिहरणार्थं तद्धननार्थं गोसर्पनखिशृङ्गिदंष्ट्रिगजचौरविप्रान्त्य
जादिभिर्हतानां महापातकिनां तत्संसर्गिणां पतितानां नपुंसका
नां स्त्रीणां पत्यादिहन्त्रीणां हीनजातिगामिनीनां गर्भघ्नीनां कु
लटानाञ्च मृतौ नाशौचं। एषां शवानां स्पर्शाश्रुपातवहनदहन
कर्म्माणि न कुर्यात्। स्पर्शादिकरणे ज्ञानाज्ञानेन कृच्छ्रातिकृच्छ्र
सान्तपनचान्द्रायणादिप्रायश्चित्तानि निर्णयसिंध्वादिग्रन्थान्त
रतो ज्ञेयानि। तेषां मृतदेहस्य जले प्रक्षेपः॥ ततः संवत्सरोत्तरं
पुत्रादिस्तदीयात्मघातादिपापानुसारेण प्रायश्चित्तं तस्य कृत्वा
नारायणबलिञ्च कृत्वा पर्णशरदाहादिपूर्व्वकमाशौचमौर्ध्व

देहिकम्म्बकुर्यात् केचित्प्रेतशरीरं दग्ध्वादाहनिमित्तंचान्द्रायण
त्रयं कृत्वा अस्थीनिसंस्थाप्याब्दान्ते पूर्व्वोक्तरीत्यौर्ध्वदेहिकमि
त्याहुः अत्रस्वजीवनसन्देहाद्भक्त्या वापुत्रादयः संवत्सरादर्वाग
पितच्चदात्मघातादिपापोक्तद्विगुणप्रायश्चित्तपूर्वकं नारायणवलिं
कृत्वा पर्णशरदाहमस्थिदाहंवा कृत्वाऽशौचमौर्ध्वदैहिकम्म्बकु
र्युः।सर्पहतेविशेषः प्रमादेन दर्पादिना वासर्पतोमृतानांवाऽशौ
चादिनकार्य्यं।नागपूजांकृत्वानारायणबलिनागदानगोदानानि
कृत्वादाहाशौचादिकार्य्यंसर्वत्रदुर्मरणेपतितादिमरणेचतत्तत्
प्रायश्चित्तादिकृत्वादाहाशौचादिकार्यं इति।। अथप्रायश्चित्तानि
उच्यन्ते।।बुद्धिपूर्वकमात्मघातेनमृतानां त्रिंशत्कृच्छ्राणिप्राय
श्चित्तं एतच्चजातिवधप्रायश्चित्तेनसमुच्चितंकार्यं।ब्राह्मणेनात्म
घातेत्रिंशत्कृच्छ्राणि।ब्राह्मणीष्वेवं।एवंशूद्रात्मघातेप्यूह्यं अ
शक्तावात्मघाते चांद्रायणद्वयं तप्तकृच्छ्रचतुष्कंचकुर्यात्।प्रमा
देनजलादिमरणेपञ्चदशकृच्छ्राः चान्द्रायणपूर्वकंतप्तकृच्छ्र
द्वयंवा।पतितमृते षोडशकृच्छ्राणि।किञ्चित्कालंमूर्च्छीकृतः
प्रायश्चित्तार्हः तस्य षोडशकृच्छ्रादिप्रायश्चित्तंपुत्रेणकृत्वाप
र्णशरदाहादिकार्यं प्रमादमरणभिन्नेषुचौर्यपरदार्यादिहेतुके
षु दुर्मरणेषुचान्द्रायण द्वयं तप्तकृच्छ्रं वा अथवाप्रायश्चित्तान
र्हाणामपिपुत्रादिर्नारायणबलिपूर्व्वंसर्व्वमौर्ध्वदैहिकंकार्य्यं
इति।। ।। अथपतितोदकदानविधिः।। सर्व्वगान्दासीमाहूयत
स्यैवेतनन्दत्वाशुद्धपूर्णघटहस्तांतांब्रूयात् हेदासिगच्छमूल्ये
नतिलांस्तोयपूर्णमिमंघटंशीघ्रमानय ततोदक्षिणामुखोपविश्य
वामपादेन तं घटं सतिलं क्षिप घटक्षेपणकालेचामुकसंज्ञकपति
तप्रेत पिव पिवेतिमुहुरुच्चारयेत् सादासीतद्वाक्यंश्रुत्वामूल्यं
गृहीत्वा तथाकुर्यात् एवंकृतेपतितनृप्तिर्नान्यथा इति।। ।।अथ
कुष्ठीमृतोविधिः।। विचर्चिकादुद्रुमश्चर्मा च चर्रीयस्तृतीयकः।।वि
कर्चूर्व्रण ताम्रौच कृष्णश्वेतस्तथाष्टकं।। मृतस्यकुष्ठिनोदेहं

तीर्थे वा भुवि वा क्षिपेत् न दाहं नोदकं पिण्डं न च दानक्रियाञ्चरेत्
यदि स्नेहाच्चरेद्दाहं यतिचान्द्रायणं चरेत् तथा च शक्त्यानुसारेण
षडब्दादि प्रायश्चित्तं कृत्वा कुष्ठादि महारोग मृतस्य दाहादिक्रि
यां कुर्यान्नान्यथा इति महारोगास्तु वातव्याध्यश्मरीकुष्ठमहो
दरभगन्दराः अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः कुन
खाश्चेति॥ ॥अथ रजस्वलामरणे विधिः॥ रजस्वलायाः प्रेता
याः संस्कारादीनि नाचरेत् ऊर्ध्वं त्रिरात्रात् स्नातानां शवधर्मेण
दाहयेत् अथवा रजस्वलां सूतिकां च मलं प्रक्षाल्य स्नापयित्वा
काष्ठवदमंत्रकं दग्ध्वाऽस्थीनि मंत्राग्निना दहेत् उभयत्र चान्द्रा
यणत्रयं प्रायश्चित्तं। मंत्रवद्दाहकरणेच्छायां तु अद्येत्याद्यमुक
गोत्राया रजस्वलावस्थामरणनिमित्तप्रत्यवायपरिहारार्थं मौ
र्ध्वदैहिकयोग्यत्वार्थञ्च चांद्रायणप्रायश्चित्तपूर्व्वकं शूर्पेणाष्टो
त्तरशतस्नानानि कारयिष्ये इति संकल्प्य चान्द्रायणत्रयं प्रत्या
म्नायेन कृत्वा यवपिष्टेन प्रेतमनुलिप्य स्वयं स्नात्वा शूर्पोदकैर
ष्टोत्तरशतवारं स्नापयेत् ततो भस्मगोमयमृत्तिकाकुशोदकैः
पञ्चगव्यैः शुद्धोदकैश्च संस्नाप्य यदन्ति यच्च दूरक इत्यादि पा
वमानीभिरापोहिष्ठेति तृचेन कयानद्दत्यादिभिश्च संस्नाप्य पू
र्व्ववस्त्रं परित्यज्य अन्यवस्त्रेण वेष्टयित्वा संदहेत् इति॥ ॥
॥अथ सूतिकाप्येवमेवम्॥ सूतिका या आद्यत्र्यहमरणे त्र्यब्दं प्रा
यश्चित्तं। द्वितीयत्र्यहे द्व्यब्दं। तृतीयत्र्यहे एकाब्दं। दशमदिने तु कृ
च्छ्रत्रयमिति। विशेषः क्वचिदुक्तः मासपर्यन्तमपि कृच्छ्रत्रयमित्य
न्ये। मितास्रायां तु कुम्भे जलमादाय पञ्चगव्यं क्षिप्त्वा पुण्यम
न्त्रैरापोहिष्ठा वामदेव्या वारुणादिभिरभिमंत्र्य पूर्व्वोक्तमन्त्रैः
संस्नाप्य विधिना सूतिकां दहेदिति विशेषः। इति रजस्वलासूति
कयोर्विधिः॥ ॥अथ गर्भिणीमरणे विधिः॥ गर्भिण्यां मृतायां
शुद्ध्यर्थं त्र्यस्त्रिंशत् कृच्छ्राणि कृत्वा गां भूमिं सुवर्णञ्च दत्वा
पृथक् कृत्य तां दहेत् सगर्भदहने तत्तद्धप्रायश्चित्तं सगर्भाया

दाहकर्तुरन्दत्र यंप्रायश्चित्तमिति॥ अथदाहाधिकारिनिर्णयः॥ तत्रश्राद्धदाहादौ औरसः पुत्रोमुख्योधिकारी औरसानांबहुत्वे ज्येष्ठाधिकारी।ज्येष्ठस्याऽभावे असन्निधौवापतितोवासर्वतः कनिष्ठाधिकारीपुत्राणांविभक्तत्वे कनिष्ठेभ्योधनंगृहीत्वाश्रेष्ठेनसर्वंकार्य्यं।ज्येष्ठस्य असन्निधौषोडशश्राद्धांतंकनिष्ठेनकार्य्यं।वर्षपर्यन्तंप्रतीक्षांकुर्य्यात् वर्षान्तरेज्येष्ठेनकार्य्यं वर्षान्तरंकनिष्ठेनेव वर्षात्प्राक्पुत्रभिन्नेनकृताः सर्वाः पुनः पुत्रेणदशगात्रं विहाय सपिण्डकरणान्ताः क्रियाः कार्याएवंकनिष्ठेनकृतंपुनर्ज्येष्ठेनकार्यं कनिष्ठस्यसाग्निकत्वेद्वादशेन्हिसपिण्डीकरणंकार्यं औरसाभावेदत्तकः दत्तकाभावेपौत्रः पौत्राभावेप्रपौत्रः अन्येतु औरसाभावे पौत्रः पौत्राभावेप्रपौत्रः प्रपौत्राभावेदत्तकः उपनीतपौत्रसत्वेपि अनुपनीतस्यौरसपुत्रस्यैवाधिकारः सचकृतचूडस्यैवाव्वर्षाधिकवयसः पूर्णत्रिवर्षस्यतु अकृतचूडस्यैव अनुपनीतेनापि मंत्रपाठपूर्वकमेव पित्रोरौर्ध्वदैहिकं सांवत्सरिकादिकंश्राद्धञ्चकार्य्यं।अशक्तौतु अग्निदानमात्रंसमंत्रकम् अनुपनीतेन कार्य्यम् अन्यत्तूष्णीं।एवंश्राद्धेपिदर्शमहालयादौसंकल्पमात्रंकार्य्यम्॥ अन्यदितरेण॥ केचिदूनत्रिवर्षेणचूडारहितेनापिदाहमात्रंसमंत्रकंकार्य्यंशेषमन्येनेत्याहुः दत्तकस्तूपनीतएवाधिकारीदत्तकाभावेप्रपौत्राभावेचभर्तुःपत्नीपत्न्याभर्त्तावकुर्यात् भर्तुरपिसपत्नीपुत्रसत्वेनाधिकारः भार्यायापि समंत्रकमेव अशक्तौतुअग्निदानमात्रंसमंत्रकंकृत्वाशेषमन्येनश्राद्धेसंकल्पमात्रं।शेषमन्येनकार्य्यं।यद्यपिविभक्तस्य संसृष्टस्यवाभ्रातुरेवधनग्रहाधिकारस्तथापिक्रियाधिकारः पत्न्याएव विभक्तासंसृष्टेतुभ्रातरिधनाधिकारोपिपत्न्याएव पत्न्याभावे विभक्तासंसृष्टस्यकन्यापिण्डदाधनहारिणी वा।तत्रापिविवाहितेवपिण्डदाधनहरातु अनूढा।दुहितुरभावेदौहित्रोधनहारीपिण्डदश्च।दौहित्राभावेभ्राता।भ्रातुर

भावे भ्रातृपुत्रः अविभक्तस्यसंसृष्टस्यच पत्न्यभावे भ्राता। संसृष्टो नामपूर्व्वंविभक्तोभूत्वा पुनःस्वधनं भ्रातृधनैरेकीकृत्येक पाकाद्युपजीविनः तत्र सोदरासोदरसमवाये सोदरएवतत्रापि ज्येष्ठकनिष्ठयोः सत्वेकनिष्ठएव। कनिष्ठभ्रातुरभावेज्येष्ठभ्रातैव। कनिष्ठबहुत्वे मृतानन्तरस्तदभावे तदनंतरादयः एवंज्येष्ठबहुत्वेमृतानन्तरक्रमेणैव सोदरभ्रातुरभावे सापत्नभ्राता तत्रापिज्येष्ठत्वादिविचारः पूर्व्ववद्बोध्यः। केचित्तु दुहितृदौहित्रपौर्धनहारित्वेपिविभक्तासंसृष्टस्यदाहादिकंभ्रात्रैवकार्य्यंसगोत्रसद्भावेभिन्नगोत्रस्यतदनधिकारादित्याहुः भ्रातुरभावे भ्रातृपुत्रः तत्रापिसोदरभ्रातृपुत्रोमुख्यः तदभावेसापत्नभ्रातृपुत्रः तदभावेपिता पितुरभावे माता मातुरभावेस्नुषा तदभावे भगिनी। तत्रानुजाग्रजसोदरासोदराणांसमवायेभ्रातृवत् भगिन्यभावेभगिनीपुत्रः समवाये तद्वदेव तदभावेपितृव्यः तत्पुत्रादयः सपिंडः तदभावेसोदकाः तदभावेगोत्रजाः तदभावे मातामह मातुलतत्पुत्रादयो मातृसपिण्डाः अनुक्रमेण मातृसपिण्डाभावेस्वपितृष्वसृमातृष्वसृपुत्राः तदभावेपितुः पितृष्वसृमातृष्वसृ मातुलपुत्ररूपाः पितृबांधवाः। एवंमातुः पितृष्वस्रादिपुत्ररूपमातृबन्धवः पितृबन्धूनामभावेऽधिकारिणः तदभावेशिष्यः शिष्याभावेजामाताश्वशुरस्यश्वशुरोजामातुः तदभावेसखा तदभावेविप्रस्तु कश्चिद्धनहारी॥ ॥अथस्त्रीणांदाहादिकारिणः॥ अनूढायाः स्त्रियाःपिता तदभावेभ्रात्रादिः ऊढायास्तुपुत्राभावेसपत्नीपुत्रः तदभावेपौत्रः प्रपौत्रः तदभावेपतिः तदभावेदुहिता तदभावे दौहित्रः तदभावेपत्युर्भ्राता तत्पुत्रः स्नुषापिताभ्राता तदभावे भ्रातृपुत्रादयः पूर्वोक्ताः अत्र सर्व्वत्र पुत्रभिन्नानां पुत्रासन्निधानात् पुत्राभावाद्वा कर्तृत्वमिस्थितम् इति॥ ॥अथसपिण्डीकरणं॥ अनाहिताग्नेः प्रेतस्यपूर्णेसंवत्सरेऽथवा। एकादशेमासिषष्ठे त्रिमासे वा त्रिपक्षके। मासान्तेद्वादशेवाह्नि कुर्य्यादेकादशेऽहनि। त

याच चतुःपुरुषसपिण्डेषु सपिण्डीकरणाभावे गर्भाधानादिक
मपि न कार्यम् एवं आवश्यकवृद्धिसुतकर्म्मशास्त्रोक्तनिष्ठः पुत्रोवा
भ्राता वा भ्रातृपुत्रो वान्यः सपिण्डो वा शिष्यो वा गौणकर्त्तापि कुल
प्राप्तवृद्धिसिद्ध्यर्थं सपिण्डनाद्यपकर्षं कुर्यात् तत्र च कृतेसुख्य
स्य पुत्रादेर्न पुनः करणं वृद्धिं विना गौणाधिकारिणा पुत्रादिना कृ
ते पुनरावर्तनीयम् एकादशाहांतकर्म्मणस्तु न पुनरावृत्तिः अत्र
द्वादशाहपदेन आशौचसमाप्त्युत्तरदिनं ग्राह्यं तेन त्रिदिनाशौचे पंच
मदिने सपिण्डीकरणं सपिण्डीकरणश्राद्धं उक्तकाले कृतं न चेत् हस्ता
र्द्रारोहिणी भेवानुराधायां च तच्चरेत् स्मृत्यर्थसारे। वर्षान्तसपिण्ड
नपक्षे वर्षान्त्य दिने पूर्व्वसंवत्सरं विमोक्षश्राद्धं कृत्वा सपिण्डनं
च्च कृत्वा परेद्युर्मृताहे वार्षिकं कार्यम् इति कालः ॥ तच्च सपिण्ड
नं पुत्रे विदेशस्थेपि सति नान्यः कुर्यात् एवं ज्येष्ठपुत्रे विदेशस्थेपि
न कनिष्ठः कुर्यात् षोडशश्राद्धानि तु ज्येष्ठाऽसन्निधाने कनिष्ठेन
कार्य्याणि पुनर्ज्येष्ठेन न कार्य्याणि आहिताग्निः कनिष्ठोपि सपि
ण्डनं कुर्यादेव वृद्धिनिमित्ते तु कनिष्ठादिभिरपि सपिंडनं कार्य्यं
वृद्धिं विना कनिष्ठपुत्रेण कृतेपि सपिंडने ज्येष्ठपुत्रेण पुनः कार्य्यं
तत्र पुनः करणे प्रेतशब्दो न वाच्यः॥ ॥अथ व्युत्क्रममृतौ सपिंडी
करणम्॥ ॥मृते पितरि यस्याथ विद्यते च पितामहः॥ तेन देया
स्त्रयः पिंडाः प्रपितामहपूर्व्वकाः॥ तेभ्यश्च पैतृकः पिंडो नियोक्तव्य
स्तु पूर्व्ववत्॥ मातर्यथ मृतायां च विद्यते च पितामही प्रपितामहि
पूर्व्वस्तु कार्यस्तत्राप्ययं विधिः॥ एवं प्रपितामहजीवनेतत् पित्रादि
भिः कार्यः यत्तु व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिंडना इति तच्चा
पि तृभर्तृभिन्नविषयं। प्रपितामहादिभिः पितुः सपिंडने कृते पश्चा
त् पितामहमरणे पि पुनः पितामहेन सह पितुः सपिंडनं कार्यं। यदा
तु पितुः सपिंडनात् प्राक् पितामहो मृतस्तदा पितामहसपिंडनं
कृत्वा पितामहादिभिः सह पितुः सपिंडनं कार्य्यं यदा च पितुर्मर
णोत्तरं पितामहः प्रपितामहो वा मृतस्तयोश्च पुत्रान्तरं सपिंडना

धिकारि देशान्तरे तिष्ठति तदा दाहाद्येकादशाहान्तमात्रं कर्म कृत्वा सपिंडनहीनाभ्याम पि पितामहप्रपितामहाभ्यां सह पितुः सपिंडनं कुर्यात् पितामहप्रपितामहयोः पुत्रान्तराभावे तु पौत्रः प्रपौत्रो वा तयोः सपिंडनं कुर्यात् पितामहस्य पुत्रान्तराभावे पौत्रेण सपिंडनं षोडश मासिकान्तमेव कर्म्म कार्यं पितामहवार्षिकादिकं तु नावश्यकं इच्छया पितामहवार्षिकादिकरणे तु फलातिशयः पितृदशाहं कुर्व्वन्यदि पुत्रो मृतस्तदा तत्पुत्रः स्वपितुरौर्ध्वदैहिकं कृत्वा पितामहौर्ध्वदैहिकं तु पुनः सर्वं आवर्तयेत् अतीते दशाहे तु न पुनरावृत्तिः पुत्रान्तराभावे पितामहसपिंडनोत्तरं पितृसपिंडनमित्युक्तं अशक्तिवशात् पित्रानुज्ञातेन पौत्रेण पितामहदशाहकर्म्मणि आरब्धे पश्चात्पितृमृतौ पित्राशौचं वहन्नेव पौत्रः पितामहौर्ध्वदैहिकं कुर्यात् ॥ ॥अथ स्त्रीषूच्यते॥ ॥पितामह्यादिभिः सार्द्धं मातरं तु सपिंडयेत्॥ केचित् पितृमरणोत्तरं मातृमरणे पित्रैव सह मातृसपिंडनमाहुः॥ दौहित्रः सपिंडनकर्ता चेन्मातामहेन सह सपिंडनमित्यपरे। सहगमने तु भर्त्रैव सह सपिंडनं। येन केनापि सपिण्डने पृथक्त्व पृथक् प्रतिवार्षिकादिश्राद्धेषु पितामह्यादिभिः सहैव मातुः पार्व्वणं कार्य्यं अत्र केचित् स्वपुत्रस्य पत्नीपुत्रयोः पत्युश्चाभावे स्त्रीणां सपिण्डनं नास्तीत्याहुः॥ लघुहारीतः। पुत्रेणैव तु कर्तव्यं सपिण्डीकरणं स्त्रियाः। पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोपि च॥ मार्कण्डेयः। सपिण्डीकरणं स्त्रीणां पुत्राभावे न विद्यते॥ अत्र अन्वारोहणे भर्त्रा सह पत्नीसंयोजनमिति पक्षे मतद्वयं प्रथमं पितृपिण्डस्य पितामहादिषु त्रिषु संयोजनं प्रथमं कृत्वा पश्चान्मातृपिण्डं पितामहादिषु संयोजयेदित्येकः। द्वितीयः प्रथमं मातृपिण्डं पित्रैव संयोज्य मातृपिण्डेनैकीकृतं पितृपिण्डं पितामहादिषु संयोजयेदित्यपरः पक्षः अत्र द्वितीयपक्ष एव युक्तः। केचित्सहगमने एकदिनमरणे वा स्त्रियाः सपिण्डनं नास्ति भर्तुः कृते सपिंडने

भार्यया अपिकृतंभवतीतिमतान्तरमाहुः।सर्व्वाभावेस्वयंपत्युः
स्वभर्तृणाममंत्रकंसपिण्डीकरणंकुर्य्युस्ततःपार्व्वणमेवच अ
पुत्रायाःस्त्रियाःपतिरेवश्वश्र्वादिभिःसपिंडनंकुर्यात् पैठीनसिः
अपुत्रायांमृतायांतुपतिःकुर्यात्सपिंडतां।श्वश्र्वादिभिःसहैवास्याः
सपिंडीकरणंभवेदितिब्रह्मचारिणामनपत्यानाञ्चव्युत्क्रममृ
तानांचसपिंडनंनकार्यमितिमतांतरं।अत्रसपिंडनाभावपक्षोन
शिष्टाचारेदृश्यते।यतीनांसपिंडीकरणंनास्तिकिन्तुतत्स्थाने
एकादशेऽह्निपार्व्वणंकार्यं।सपिंडीकरणश्राद्धमन्येनैवकार्यं
नत्वमानादी अनुमासिकान्यप्यन्येनैवकार्याणि प्रेतसपिंडना
दूर्ध्वंपितृलोकंसगच्छति।कुर्यात्तस्यचपाथेयंद्वितीयेऽह्निसपिं
डनादितिवचनात् त्रयोदशेहिपाथेयंश्राद्धंकृत्वापुण्याहवाच
नादिकंकृत्वावर्षपर्यन्तंप्रत्यहमुदकुम्भश्राद्धंकुर्यात्।अशक्तौ
मासिकश्राद्धेप्येवोदकुम्भोदेयः सपिंडीकरणात् प्राकृयेनियमा
स्ते चतुःपुरुषपर्यताः।महातीर्थस्यगमनमुपवासव्रतानिच।सपिं
डीश्राद्धमन्येषांवर्जयेद्वत्सरंबुधःपत्नीपुत्रस्तथापौत्रोभ्राताता
त्तनयस्नुषा॥मातापितृव्यश्चैतेषांमहागुरुनिपातने॥कुर्यात्सपि
ण्डनश्राद्धंनान्येषांतुकदाचन।एकादशाहपर्यन्तंप्रेतश्राद्धंच
रेत्सदा।पित्रोर्मृतौचनान्येषांकुर्याच्छ्राद्धंतुपार्व्वणम्॥गयाश्रा
द्धंमृतानांतुपूर्णेत्वब्देप्रशस्यते॥तीर्थश्राद्धंगयाश्राद्धंश्राद्धम
न्यच्चपैतृकम्।अब्दमध्येनकुर्वीतमहागुरुविपत्तिषु॥केचिद्व
र्षान्तसपिण्डनपक्षेएवैतेसर्वेनिषेधानतुद्वादशाहसपिंडनप
क्षमित्याहुः।अपरेतुद्वादशाहसपिण्डनपक्षेपिसर्वएतेनिषेधा
इत्याहुः।कृतेसपिंडीकरयेनरःसंवत्सरात्परम्॥प्रेतदेहंपरि
त्यज्यभोगदेहंप्रपद्यतेइतिवचनात् तेनसपिंडीकरणसत्त्वेपि
वृद्धिदैवपित्र्येष्वनधिकारः वृद्धिनिमित्तापकर्षेतुवृद्धावधिका
रःइतिभाति।अतएवकालतत्त्वनिर्णये।संकटादौमृतपितृकाप
न्नानांसंस्काराभ्युदयिकंमृतमातापितृकेनपुत्रेणस्वापत्यसंस्का

रादिकञ्च प्रथमाब्देपिकार्यं दर्शमहालयादिश्राद्धस्यनित्यत
र्पणस्यचाप्येवमेवव्यवस्थाज्ञेया। मृतेपितरिपितामहजीव
नेपित्रेपितामहात् पराभ्यांचश्राद्धंदेयम् एवंपितृपितामहम
रणेप्रपितामहजीवनेप्यूह्यम्॥ असमाप्तषड्वर्षस्यपूर्वक्रि
यामात्रम् असमाप्तद्विवर्षस्यपूर्व्वक्रियानास्तिकिन्तुखननमा
त्रं केचित्तु असमाप्तषड्वर्षस्य त्रैवर्णिकस्यस्त्रीशूद्रयोश्चा
परिणीतयोस्त्रिविधापिक्रियानुग्रहादिनानत्वावश्यकीत्याहुः
इतिशुद्धिविवेके॥ अथश्राद्धे भार्यारजोवती विवाहे वा दर्शादिश्राद्धं पा
ककर्ता अन्येन चेदामान्नेन दर्शश्राद्धं पञ्चमेऽहनीति पक्षांतरं
प्रत्याब्दिकंमासिकंरजोदोषेपितद्दिनएवकार्य्यः पंचमेऽहनीत्य
परःपक्षद्वयेग्रन्थसम्मतिः भार्य्यान्तरसत्वेतद्दिनएवश्राद्धकाले
रजस्वलादर्शनादिकंवर्ज्यंतादृशगृहासंभवेस्वसपिंडस्यपाक
कर्त्तुरसंभवे पंचमेऽहनीति अपुत्रास्त्रीरजोदोषेभर्त्तुराब्दिकादि
कंपञ्चमेहनिकुर्यान्नत्वन्यद्वारातद्दिने विवाहव्रतचूडासुमा
तायदिरजस्वला॥ तस्याःशुद्धेःपरंकार्य्यंमंगलंमनुरब्रवीत्॥
नांदीश्राद्धोत्तरंरजस्वलायांशान्तिंविनायकशान्तिंकृत्वाकार्यं
केचित्तुमुहूर्तान्तराभावेप्रारम्भात् प्रागपिरजोदोषे श्रीपूजनादि
विधिनाशान्तिंकृत्वाकार्य्यं मातुलपितृव्यादौकर्तरितत्पत्न्यां
रजस्वलायामपिमंगलंनेतिसिंधुः। विवाहव्रतयज्ञेषुश्राद्धेहोमे
र्चने जपे। आरब्धेसूतकंनस्यादनारब्धेतुसूतकं॥ विवाहात्
पूर्व्वकन्यायांरजोदर्शनेमातृपितृभ्रातॄणांनरकपातः। कन्यायाः
वृषलीत्वंतद्भर्त्तुर्वृषलीपतित्वम्। अत्रशुद्धिप्रकारः। कन्यादाता
ऋतुसंख्ययागोदानानि। एकं वागोदानंयथाशक्तिब्राह्मणान्
भोजयेद्दानेयोग्यो भवेत् कन्यातूपवासत्रयान्तेगव्यपयःपानं
कृत्वाविप्रकुमार्य्यैभूषणंदत्वोद्वाहयोग्याभवतिवरश्चकुष्मा
ण्डहोमपूर्व्वकंतासुद्वयन्नदोषीस्यात् विवाहकालेरजोदोषे
तांस्नापयित्वा युञ्जानेतितैत्तिरीयमंत्रेणप्रायश्चित्तंहुत्वाहो

मतंत्रंसमापयेत् नात्रवरस्यापिदोषःनकन्यारजोदोषः इति ॥
॥ अथनान्दीश्राद्धनिर्णयः॥ ॥जीवेतुयदिवर्गाद्यस्तंवर्गन्तु
परित्यजेत्। जीवत्पितृकःस्वापत्यसंस्कारेषुनान्दिश्राद्धंकुर्या
त् वर्गत्रयाद्येषुमातृपितृमातामहेषुजीवत्सुनान्दीश्राद्धलोप
एवसुतसंस्कारेषूचितः।द्वितीयविवाहाधानादौ स्वसंस्कारकर्मसु
॥ येभ्यएवपितादद्यात् तेभ्योदद्यात्स्वयंसुतः।माणवकपितुः
प्रवासादिनाअसन्निधानेभ्रात्रादिमाणवकस्यपितुर्मातृपिता
महीप्रपितामह्याइतिउच्चार्यश्राद्धंकुर्यात् मृतपितृकस्यपितृ
व्यभ्रात्रादिरस्यमाणवकस्य मातृपितामहीत्युच्चारयेत् भ्रात्रादे
रभावेस्वयमेवस्वपितृभ्योदद्यात् एवंजीवत्पितृकोपिपितु
रसन्निधानेभ्रात्रादेरभावेपितुःपितृभ्यःस्वयमेवनान्दीमुखंकु
र्यात्।मृतपितृकस्योपनयनादौपितृव्यमातुलादिकुर्वन्तस्यसं
स्कार्य्यस्यपितृपितामहेत्याद्युच्चार्य्यश्राद्धंकुर्यात्जीवतःपितु
रसन्निधानेनकुर्व्वन्मातुलादिःइति॥ ॥अथश्राद्धेविहितपुष्पाः
णि॥ ॥अगस्त्यंभृंगराजश्चतुलसीकमलंतथा॥चम्पकंतिल
पुष्पञ्चदूर्व्वाश्चपितृवल्लभाः॥सुकुमारैःकिसलयैर्यवदूर्वाङ्कु
रैरपि॥ जलोद्भवैश्चकुसुमैर्मल्लिकाचूतपुष्पकैः॥ अतिमुक्तैः
श्चतगरैःसंपूज्याःपितरःसदा॥जातीपुष्पैर्विप्रपूजांकुर्यात्पिं
डार्चनंतुन॥ ॥अथवर्ज्यपुष्पाणि॥ ॥करवीरञ्चधनूरंबिल्व
पत्रंचकेतकी॥बकुलंकुन्दपुष्पंचकिंशकंचकुरण्टिका॥सर्व्वा
णिरक्तपुष्पाणिवर्जयेच्छ्राद्धकर्मणि॥जलोद्भवानिदेयानिरक्ता
न्यपिविशेषतः॥ इति॥ ॥अथप्रेतकृत्यमुहूर्तविचारः॥ ॥
कालान्तरेकृतप्रेतकार्येतुदिनंशोध्यमेव।संवत्सरादूर्ध्वंप्रेतका
र्ये उत्तरायणंकालःश्रेयान् तत्रापिकृष्णपक्षःनन्दात्रयोदशी
त्रिदिनंवर्ज्जयेत् शुक्रशनैश्चरवारौवर्ज्यौनक्षत्रेषुभरणीकृत्ति
काश्लेषामघाधनिष्ठादिपंचकंत्रिपुष्कराणि चातिदुष्टानिव्यतिपा
तपरिघवैधृतयोगेषु विष्टिकरणेषु चतुर्थाष्टमद्वादशराशिस्थिते

चन्द्रे गतिदोषः। रोहिणीपुनर्वसूपूर्वोत्तराचित्राविशाखाऽनुराधा पूर्वाषाढाह्निपुष्कराणि ईषद्दुष्टानि सम्भवे वर्ज्यानि शेषाण्य दुष्टानि ग्राह्याणीत्यर्थः। इति॥ ॥अथगयाश्राद्धविचारः॥ ॥ ॥वायुपुराणे। गयायां सर्व्वकालेषु पिण्डं दद्याद्विचक्षणः। अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ। महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि। कृतोद्वाहोपि कुर्व्वीत पिण्डनिर्वपणं सदा। गयाश्राद्धं मृतानां तु पूर्णेऽब्दे प्रशस्यते। अस्य वचनस्य केचित् वर्षान्तसपिण्डपक्षे आहुः केचिद्वर्षान्तरेप्याहुः इति॥ ॥अथपञ्चकेमरणेविशेषः॥ ॥ पञ्चके मरणे दाहे च शान्तिपुत्तलकं कर्त्तव्यं केवलं पंचकमरणे न तु दाहे केवला शान्तिः पञ्चके दाहे न तु मरणे पञ्च पुत्तलैः सह प्रेतं दहेत् न शान्तिः पुत्तलकन्तु दर्भमयं यवपिष्टलिप्तं पञ्चोर्णासूत्रवेष्टितं ऋक्षमंत्रेणाभिमंत्रितं प्रथमं शिरसि द्वितीयं नेत्रयोः तृतीयं वामकुक्षौ चतुर्थं नाभौ पञ्चमं पादयोः प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः प्रेतहर्त्ता इति पञ्चाहुतयः॥ एवं त्रिपुष्करेपि त्रिपुष्करे तु मरणे दाहे वा शान्तिपुत्तलकं कर्त्तव्यं न तु पञ्चकवत्॥ ॥अथग्रहणनिर्णयः॥ ॥ रविवारे सूर्य्यग्रहः चन्द्रवारे चन्द्रग्रहः चूडामणियोगः तत्र दानादिकमनन्तफलं ग्रहणे स्नानममंत्रकं सुक्तिस्नानाभावे सूतकित्वानपगमः जाताशौचे मृताशौचे च ग्रहणनिमित्तं स्नानदानश्राद्धादि कार्यं स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला। पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत्। न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत्। त्रिरात्रमेकरात्रं वा समुपोष्य ग्रहणे स्नानदानादि सुष्ठानेमहाफलं एकरात्रपक्षे ग्रहणदिनात् पूर्व्वदिने उपवासः इति केचित् ग्रहणसम्बन्धाहोरात्र उपवास इत्यपरे। ग्रहणे देवपितृतर्पणं कार्यं। सर्वेषामेव वर्णानां सूतकं राहुदर्शने। मंत्रदीक्षा प्रकुर्व्वाणो मासर्क्षादीन्न शोधयेत् मंत्रग्रहणे सूर्य्य

ग्रहणमेवश्रेष्ठं।चन्द्रग्रहणेदारिद्र्यं।ग्रहणकालेशयनेरोगोमूत्रे
दारिद्र्यंपुरीषेकृमिःमैथुनेग्रामशूकरोऽभ्यंगेकुष्ठीभोजनेनरकः
पूर्व्वपक्वान्नंग्रहणोत्तरंत्याज्यं।ग्रहणकालस्थितजलपानेपाद
कृच्छ्राभिधानाज्जलमपित्याज्यं।काञ्जिकतक्रघृततैलपाचित
मन्नंक्षीरञ्चपूर्वसिद्धंग्रहणोत्तरंग्राह्यं।घृतेसंधितेगोरसेषुग्रह
णकालेकुशान्तरायंकुर्यात्‌सूर्यग्रहेग्रहणप्रहरादर्वाक्याम
चतुष्टयंवेधः चन्द्रग्रहेतुप्रहरत्रयं।तथाचदिनप्रथमप्रहरेसू
र्यग्रहेपूर्वरात्रिप्रहरचतुष्टयेनभोक्तव्यं।द्वितीयेयामेग्रहणेरा
त्रौद्वितीययामादौनभोक्तव्यंएवंरात्रिप्रथमप्रहरेचन्द्रग्रहेदि
नद्वितीययामादौनभुञ्जीतरात्रौद्वितीययामादौग्रहणेदिनतृती
ययामादौनभुञ्जीत।बालवृद्धातुरविषयेतुसार्द्धप्रहरात्मकोमु
हूर्त्तत्रयात्मकोवावेधः।शक्तस्यवेधकालेभोजनेत्रिदिनमुपो
षणंप्रायश्चित्तं।ग्रहणकालेभोजनेनप्राजापत्यंप्रायश्चित्तंचन्द्रा
स्तग्रस्तोदयेतुयामचतुष्टयवेधात्‌॥तत्पूर्वदिवानभुञ्जीतकेचि
त्तुचन्द्रपूर्णमंडलग्रासेयामचतुष्टयंवेधःएकदेशग्रासेयामत्रयं
।ग्रस्तास्तेतु।ग्रस्तावेवास्तमानन्तुरवीन्दूप्राप्नुतोयदि।परेद्युरु
दयेस्नात्वाशुद्धोभ्यवहरेन्नरः।सूर्य्यग्रस्तास्तादौषण्मुहूर्तात्म
कंवेधंत्यक्त्वाग्रहणात्पूर्वंभोक्तव्यमितिकेचित्‌ चन्द्रग्रस्तास्ते
उत्तरदिनेसन्ध्याहोमादौनदोषः।ग्रहणदिनेपित्र्यादेर्वार्षिकश्रा
द्धप्राप्तौ।आमेनहेम्नावाकार्यं।स्वजन्मराशेस्तृतीयषष्ठैकादश
दशमराशिस्थितग्रहणंशुभप्रदं।द्वितीयसप्तमनवमपञ्चम॰
स्थानेषुमध्यमं जन्मचतुर्थाष्टमद्वादशराशिस्थितम् अनिष्टप्र
दं यस्यजन्मराशौजन्मनक्षत्रेवाग्रहणंतस्यविशेषतोऽनिष्टप्रद
त्वेनगर्गाद्युक्ताशान्तिःकार्या अथवाबिम्बदानंकार्य्यं यस्यजन्म
राश्यादिग्रहणंतेनराहुग्रस्तंरवीन्दुबिम्बंनावलोकनीयम् इत
रजनैरपिपटजलादिव्यवधानेनैवग्रस्तबिम्बंद्रष्टव्यंनसाक्षात्‌
मण्डलकार्येषुपूर्णग्रासेचंद्रग्रहेद्वादश्यादितृतीयान्तंदिनसप्त

कंवर्ज्यं। सूर्यपूर्णग्रासे एकादश्यादिचतुर्थ्यन्तदिनानि वर्ज्यानि खण्डग्रहणे चतुर्दश्यादिदिनत्रयंवर्ज्यं। ग्रस्तास्ते पूर्वदिनत्रयं वर्ज्यं। ग्रस्तोदये परंदिनत्रयं वर्ज्यं। ग्रहणभं पूर्णे षण्मासं अर्धेमासत्रयंपादेपक्षत्रयंत्याज्यं। पूर्वसंकल्पितस्य द्रव्यस्य ग्रहणोत्तरंदानेन द्विगुणं देयं भवतिइतिग्रहणविचारः॥ ॥ अथतैजसपात्रशुद्धिः॥ ॥ सुवर्णरूप्यशंखअश्मशुक्तिस्फटिककांस्यलोहताम्रपैत्तलरंगसीसकमयानि भाजनानि केवलजलेन शुद्ध्यंति। शूद्रोच्छिष्टादिलेपयुक्तानि। क्षारोदकआम्लोदकाभ्यां यथायोग्यंशुद्ध्यति। शूद्रोच्छिष्टेन चिरकालोपघाते वारत्रयंक्षारोदकक्षालनानन्तरमग्नौ यावत्सहनक्षेपात्शुद्ध्यंति। एकवारंश्वकाकशूद्रोच्छिष्टदूषितानि गवाघ्रातानि च कांस्यानि दशवारं क्षारोदकमार्जनाच्छुद्ध्यंति। अनेकवारंश्वकाकशूद्रोच्छिष्टदूषितानि एकविंशतिवारं क्षारोदकमार्जनात् शुद्ध्यंति। त्रैवर्णिकस्य यस्मिन् भाजने शूद्रेण भुक्तं तच्चतुर्भिर्वारैर्मार्जनानन्तरमग्नौनिक्षिप्तंप्रक्षालितहस्ताभ्यां गृहीतं शुद्ध्यन्ति सूतिकोच्छिष्टं मद्यसुराभिः सकृदुपहितं कांस्यभाजनमग्नौप्रतापनात् शुद्धिः असकृदुपहिते पुनर्घटनेन शुद्धिः गण्डूषपादशौचे यस्मिन्कांस्यभाजने तत् षण्मासान्निखननानन्तरं वन्हौ प्रतापनाच्छुद्ध्यति मूत्रपुरीषरेतःप्रभृतिभिः शारीरैर्मलैरल्पकालमुपहतानि तैजसपात्राणि सप्तरात्रं गोमूत्रे महानद्यां वा स्थापनाच्छुध्यंति अनेकवारंमूत्राद्युपहतानि शवसूतिकारजस्वलोपहतानि च वारत्रयक्षारोदकप्रक्षालनानन्तरं यावत्सहनमग्नौप्रतापनाच्छुध्यंति चिरकालं व्याप्य वारंवारंमूत्राद्युपहतानि पुनर्घटनेनशुध्यंति। लोहानांदहनाच्छुद्धिः भस्मनागोमयेनवा दहनात् खननाद्वापि। शैलानामंभसापिवा। काष्ठानान्तक्षणान् शुद्धिर्गोमयेन जलैरपि मृन्मयानान्तु दहनात् शुद्धिरिष्यते दन्तशृंगशांखशुक्तीनां जलयुक्तवालुकाभिः अत्यन्तोपघाते अन्यथा जलेन कांचनराजतानामद्भिः कमण्डलूनां क्षारोद

काभ्याम्॥ ॥अथवस्त्राणांशुद्धिः॥ ॥शौचसहस्रंरोमाणांवा
य्वग्न्यर्केन्दुरश्मिभिः॥ रेतःस्पृष्टंशवस्पृष्टमाविकंनैवदुष्यति॥ ॥
आविकंछागादिविकारं।अत्यंतोपहतस्य वस्त्रस्यप्रक्षालितंयत्
तन्चविरज्यतेतच्छिद्यात्।कृष्णाजिनानांबालैश्च बालानांमृद्भि
रम्भसा॥ गोमूत्रेणास्थिदन्तानांक्षौमाणांगौरसर्षपैः॥ बाला
नांचामराणांक्षौमं पट्टवस्त्रं।मार्ज्जनंयज्ञपात्राणांपाणिनायज्ञक
र्म्मणि।चमसानांग्रहणाञ्च शुद्धिःप्रक्षालनेनतु।चरुणांस्रुक्स्रुवा
णांचशुद्धिरुष्णेनवारिणा।गुडादीनामिक्षुविकाराणांप्रभूतानां
वाय्वग्निदाहनेसर्व्वलवणानाञ्चसर्वद्रव्याणांपक्वानां लवण
स्यगुडस्यचनान्यच्छौचंपरित्यागादशुद्धानामितिस्थितिः ता
पनंघृततैलानांपावनंगोरसस्यतु।तन्मात्रमुद्धृतंशुध्येत्कठिन
न्तु पयोदधि।अविलीनतयासर्पिर्विलीनंस्त्रपणेनतु।अविलीनंक
ठिनंवहूनांकुसुमकार्पासगुडलवणानांसर्पिषाकठिनीभूतानां
श्वचाण्डालादिस्पर्शेप्रोक्षणेनैवशुद्धिः द्रवद्रव्याणिभूरीणिपरि
प्लाव्यानिचाम्भसा। सस्यानिव्रीहयश्चैवशाकमूलफलानिच।स
त्कान्तुदूषितंभागंप्लाव्यान्यथजलेनतु।अशुचिंसंस्पृशेद्यस्तुए
कएवसदुष्यति।तंस्पृष्ट्वान्योनदुष्येतसर्व्वद्रव्येष्वयंविधिः॥ ॥
॥अथस्वर्णरजतधान्यादिप्रमाणमाह॥ ॥वराटकानांदश
कद्वयंयत्साकाकिणीताश्चपणश्चतस्रः। तेषोडशद्रम्मइहाव
गम्योद्रम्मै स्तथाषोडशभिश्चनिष्कः॥ तुल्यायवाभ्यांकथि
तात्रगुञ्जावल्लस्त्रिगुञ्जोधरणंचतेष्टौ॥ गद्याणकस्तद्वयमिन्द्र
तुल्यैः वल्लैस्तथैकोधटकःप्रदिष्टः॥दशार्द्धगुञ्जंप्रवदन्तिमाषंमा
षाह्वयैःषोडशभिश्चकर्षं।कर्षैश्चतुर्भिश्चपलंतुलाज्ञाः कर्षंसु
वर्णस्यसुवर्णसंज्ञम्॥ द्यंकेन्दुसंख्यैर्धटकैश्चसेरस्तैः पंचभिः
स्यात्सद्घटिकाचताभिः मणोष्टभिस्त्वालमगीरशाहकृतात्रसंज्ञा
जराजपूर्षीहृकृष्णलेरूप्यमाषोधरणंशोडशैवते॥ शतमानं
तुदशभिर्धरणैःपलमेवतु॥ पलद्वयंतुप्रसृतिंकुडवोद्विगुणंमतं

॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः॥ आढकैस्तैश्चतु
र्भिश्च द्रोणस्तु कथितो बुधैः॥ द्रोणद्वयेन सूर्पः स्यात् द्रोणैः षोडश
भिः खारी विंशत्या कुम्भ उच्यते॥ कुंभैस्तैर्दशभिर्वाहो धान्यमानं
प्रकीर्त्तितम्॥ निष्कः सुवर्णाश्चत्वारः पलं निष्कचतुष्टयम्। पलं
प्रकुञ्चकं मुष्टिः इति महार्णवः कुडवः सेरचतुर्थांशः प्रस्थः एकः
सेरः॥ १०० पल १ तुला २० तुला १ भारः १० भार १ आचितः शाकटः
२० वराटका १ काकिणी ८० वराटका १ पणः १२८० वराटका १ द्रम्मः
१ कार्षापणः १ कार्षिकः १ द्रम्मः ४ निष्कः॥ ४ मासे चांदी १ कार्षापण
पुराणः द्वाभ्यां यवाभ्यां गुंजा त्रिभिः गुंजैः वल्लः ३ रत्ती अष्टभिः व
ल्लैः धरणं ३ मासा धरणद्वयेन गद्याणकः ६ मासा। चतुर्दशैः वल्लैः
घटकः ५ मासा २ रत्ती। वर्तमानव्यवहारे प्रमाणम्॥ कर्षमासे
१० पलमासे ४० तोला मासे १२ भरीमासे १० प्रसृति। ३ तो· ८ मा·
८ भरी १॥ कम डेढ छिटाक। कुडवः। १३ तो· ४ मा· १४ भरी – कम
पवने ३ छटाक प्रस्थः। ५३ तो· ४ मा· ५६। कम ११। छिटाक। आढ
कः। २१३ तो· ४ मा· २२३ भ २ सेर १२॥ छिटाक। द्रोणा। ८५३ तो ४
मा· ८९२ भ ११ सेर अर्धपाव॥ खारी। १३६५३ तो ४ मा १४५३५ भ
४ मन २२ सेर। सूर्प। १७०६ तो ८ मासा १७८४ भ री २२। सेर॥ कुंभ।
१७०६६ तो ८ मा १७८४ भारी ५ म· २३ सेर॥ बाहुः। १७६६६ तो ८
मा· १७०८४ भ ५५ म ३० सेर द्वाभ्यां गुंजाभ्यां रूप्यमाषः पु
राणः १३ मासेका १ धरण १० धरणका १ पल शतमानशास्त्रे
५ गुंजा माषः व्यवहारे ८। १३ माषा १ कर्ष ४ कर्ष १ पल अस्स श
तमान सुवर्ण कुरु विस्त। कर्षचतुष्टयेन राजतो निष्कः ४ मासे
चांदी १ निष्क स्वर्णनिष्कोप्ययम्। १९२ धटक १ सेर ८४ भरी
५ मासे २ रत्ती की धटक संज्ञा॥ ॥ अथ कृच्छ्रादिव्रतनिर्णयः
॥ ॥ नक्तव्रतं॥ दिनं विलंघ्य रात्रौ सार्द्धयामाभ्यन्तरे मितभो
जने नक्तव्रतम्॥ उपवासः। दिवारात्रमभोजनमुपवासः॥
प्राजापत्यम्॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं त्र्यहं

परञ्च नाम्नी यात् प्राजापत्यः सउच्यते। सायंद्वाविंशतिर्ग्रासः प्रातः षड्विंशतिस्तथा। अयाचिते चतुर्विंशतिः सायं द्वादश प्रातः पंचदशेतिवा॥ प्राजापत्यमेव कृच्छ्रः॥ ॥अथपादोनकृच्छ्रः ॥द्व्यहं प्रातर्द्व्यहं सायं द्व्यहमद्यादयाचितम्। द्व्यहमुपवास इति एकभक्त अयाचितोपवासपादैरेतत् इत्यपि॥ कृच्छ्रार्द्धं। सायंप्रातस्तथैवैकं दिनद्वयमयाचितं। द्व्यहमुपवास इति अयाचितोपवासपादाभ्यां इति स्मृत्यर्थसारे। पादकृच्छ्रम्॥ एकैकदिनक्रमेण दिनचतुष्टयम्॥ ॥ ॥इदमेव शिशुकृच्छ्रम्॥ ॥ विप्रादिवर्णक्रमेणोपवासत्रयायाचितत्रयनक्तत्रयएकभक्तत्रयरूपाः पादकृच्छ्रा इति आपस्तम्बः अयमेवातिकृच्छ्रः स्यात् पाणिपूरान्नभोजनैः अत्रयेषु नक्तादिदिनेषु भोजनं तेषु पाणिपूरान्नता॥ अतिकृच्छ्रः। नवाहं एकैकग्रासः अंत्यत्रिदिनमुपवासः। इति मनुः॥ अत्र प्राजापत्यत्रयमिति चतुर्विंशतिमते कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिः पयोत्र जलं तच्च सायं प्रातर्मध्यान्हेषु पेयं द्विगुणोतिकृच्छ्र एव कृच्छ्रातिकृच्छ्रः इतिमयः। तेन अयं षट् प्राजापत्यसमः॥ ॥अथ तप्तकृच्छ्रम्॥ तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः। उष्णोदकान्निर्गतस्य वाष्पस्य पानमुष्णानिलपानम् एतच्च गात्रपूरणमात्र पर्य्यंतं उष्णादंगाराद्वा तच्च षट्पलमम्बु त्रिपलं क्षीरं एकपलं घृतं एषएव शीतैः शीतकृच्छ्रः॥ तप्तकृच्छ्रः। तप्तक्षीरघृतोबूनामेकैकं प्रत्यहं पिबेत्। एकरात्रोपवासश्च तप्तकृच्छ्रमुदाहृतम्॥ ॥ अथपर्णकृच्छ्रः॥ ॥पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः। प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः। एषां पक्वोदकैः पर्णः पलाशः राजीवं पद्मम् अयं पंचदिनसाध्यः त्रिरात्रोपवासान्ते पलाशादि पंचकक्वाथोदकपाने॥ अपरः पर्णकृच्छ्रः॥ ब्रह्मकूर्चः। चतुर्दश्यामुपोष्य परेद्युः पूर्णिमायां

पञ्चगव्यपाने ब्रह्मकूर्चः॥ सान्तपनकृच्छ्रः॥ पञ्चगव्यपा
नञ्च भोजनस्थाने अत्रार्धाधेनुः अत्र होमोप्यस्ति पञ्चगव्यहो
मश्च सप्तपत्रैरच्छिन्नाग्रैः कुशैः इरावती इदंविष्णुमानस्तोकेश
वती इति ऋग्भिः कार्यः हुतशेषंप्रणवेनालोड्य प्रणवेन गृही
त्वा मध्यपलाशपत्रेण स्वर्णपात्रेण ताम्रपात्रेण वा ब्रह्मतीर्थेन
पिवेत् एवं द्विरात्रः सान्तपनकृच्छ्रः स्मृत्यर्थसारे। पराकस्तु। द्वा
दशाहोरात्रोपवासः॥ सौम्यकृच्छ्रः॥ पिण्याकाचामतक्रा
म्बु सक्तूनांप्रतिवासरं एकरात्रोपवासश्च सौम्यकृच्छ्रोयमुच्य
ते। पिण्याकं तिलपिण्डः। आचाम ओदनस्रावः तक्रंजलंस
क्तवश्च क्रमेण पञ्चदिनेषु षष्ठेऽहनि उपवासः। पिण्याकं
सक्तवस्तक्रम् चतुर्थेहन्यऽभोजनं। वासोवैदक्षिणां दद्यादित्य
परः॥ सौम्यकृच्छ्रः॥ अत्रोभयत्र प्राणयात्रामात्रनिर्वाह
क्षमं पिण्याकादिग्रास्यं पिण्याकादीनां पञ्चानां प्रत्येकं त्रि
रात्रोपयोगाभ्यासे पञ्चदशदिनस्तुलापुरुषः पिण्याकादि
पञ्चानां एकैकदिनोपयोगोन्तरं त्रिरात्रमुपवासेऽष्टदिन
साध्यस्तुलापुरुषः। एषां पञ्चानां एकैकस्य त्र्यहभोजनेष
डहं वायुभक्षणे चैकविंशतिरात्रसाध्यः॥ श्रीकृच्छ्रस्तु॥ ॥
त्र्यहं पिवेत्तु गोमूत्रं त्र्यहं वै गोमयं पिवेत् त्र्यहं यावकम् एषः
श्रीकृच्छ्रः॥ ॥अथयावककृच्छ्रः॥ ॥यवानां अप्सुसाधिता
नां सप्तरात्रं पक्षंमासं वा प्राशने यावककृच्छ्रः॥ जलकृच्छ्रः॥
॥ अनश्नो जलस्थोऽहोरात्रं क्षिपेत् एषः जलकृच्छ्रः उदक
सक्तूनां समाभ्यवहारेण अपरः॥ बिल्वैर्वा फलकैर्वापि पद्
मासैरथवा शुभैः मासाशनेन श्रीकृच्छ्रः कथ्यते च द्विजोत्तमैः
॥ ॥वज्रकृच्छ्रः॥ गोमूत्रयावकपाने एको वज्राख्यः कृच्छ्रः॥
॥ ॥अथसान्तपनानि॥ ॥ पूर्वेद्युः पंचगव्यमात्राशनं परेद्यु
रुपवासः इति द्वैरात्रिकं सान्तपनम्॥ ॥यतिसान्तपनम्॥
पञ्चगव्यं त्र्यहाभ्यस्तं यतिसान्तपनं स्मृतम् अत्र चतुर्थेउप

वासः अत्रापि होमः पंचगव्योपवासाः पञ्चषष्ठउपवासः इ
तिषडहाः सान्तपनम्॥ ॥महासान्तपनम्॥ गोमूत्रं गोमयं
क्षीरं दधि सर्पिः कुशोदकानि क्रमेण एकैकंप्रत्यहं पीत्वा एक
रात्रोपवासेसप्ताहं साध्यो महासान्तपनः गोमूत्रगोमयक्षीर
दधिसर्पिषांक्रमेण एकैकस्य त्र्यहं त्र्यहमुपयोगे पंचदशाहि
के तत् षण्णाम् एकैकमे तेषां त्रिरात्रमुपयोजयेत् त्र्यहं चो
पवसइदं अं त्यमित्येकविंशतिरात्रसाध्यमेतत्॥एतान्येव
तु पेयानि एकैकंतुद्व्यहं द्व्यहमिति सान्तपनानि॥ ॥अथचान्द्रा
यणानि॥ ॥पिपीलिकामध्यचान्द्रायणम् एकैकं ह्रासयेत्
पिंडं कृष्णे शुक्लेच वर्धयेत् उपस्त्रिषवणमेतच्चांद्रायणं स्मृ
तं कृष्णप्रतिपद्यस्यारम्भः कृष्णप्रतिपदि चतुर्दशग्रासान्ग्र
सित्वा ततः एकैकं ह्रसित्वा चतुर्दश्यामेकं ग्रसित्वा अमाया
मुपोष्य पुनः शुक्लप्रतिपदमारभ्य पूर्णिमान्तं यावद्वर्द्धयेत्
ग्रासश्च मयूराण्डप्रमाणः आर्द्रामलकप्रमाणो वा॥कुक्कुटाड
प्रमाणं स्याद्यावद्ग्रासस्य विशेन्मुखे अत्रिःइति पिपीलिकाम
ध्यम्॥ ॥अथयवमध्यचान्द्रायणम्॥ ॥एवमेवविधिं कृ
त्स्नमाचरेद्यवमध्यके शुक्लपक्षादि नियतंचरेच्चान्द्रायणव्र
तम् अत्र शुक्लप्रतिपदादि ग्रासवृद्धिः पूर्णिमान्तं ततो ह्रासोः
मान्तः अत्रैकादश्यादि व्रतलोपेनदोषावहः॥ ॥यतिचान्द्रा
यणम्॥ ॥अष्टावष्टौ समश्नीयात् पिण्डान्मध्यंदिनेस्थितः
नियतात्माहविष्याशी यतिचान्द्रायणंस्मृतं मासमितिशेषः
एतत् प्राजापत्यचतुष्टयसममिति बृहद्विष्णुः॥ ॥अथशि
शुचान्द्रायणम्॥ ॥चतुरः प्रातरश्नीयात् पिण्डान्विप्रः समाहि
तः चतुरोस्तमिते सूर्ये शिशुचांद्रायणं स्मृतम्॥ ॥अथऋ
षिचान्द्रायणम्॥ ॥त्रींस्त्रीन् पिंडान् समश्नीयान्नियतात्
मा दृढव्रतः हविष्यान्नस्यवैमासमृषिचान्द्रायणं स्मृतम्॥
॥अथसोमायनव्रतम्॥ ॥गोक्षीरं सप्तरात्रन्तु पिबेत् स्तनच

तुष्टयात् स्तनत्रयात् सप्तरात्रं सप्तरात्रंस्तनद्वयात्स्तनात्त थैवषड्रात्रं त्रिरात्रंवायुभक्षयेत् चत्वारिंशदधिकशतद्वयग्रासानां पंचविंशत्यधिकशतद्वयग्रासानां वाशनेपि चान्द्रायणं पिपीलिकायवमध्ययोः प्रतिपद्यारम्भः इतरेषां दिनान्तरेपि इति चान्द्रायणानि ॥ ॥ अथचान्द्रायणादिप्रत्याम्नायः ॥ ॥ नक्तव्रतम् ॥ गुंजाद्वयपरिमितरूप्यमाषदानम् ॥ उपवासः ॥ रूप्यमाषत्रयं एकविप्रभोजनं वासहस्रगायत्रीजपोवा द्वादशप्राणायामो वा ॥ प्राजापत्यम् ॥ पयस्विनीदानंतदभावेमूल्यम् ॥ पादोनकृच्छ्रम् ॥ चतुःपणाधिककार्षापणद्वयमशक्तौ ॥ कृच्छ्रार्द्धम् ॥ सार्द्धकार्षापणसममिति गौडाः ॥ पादकृच्छ्रम् ॥ द्वंद्वंद्वादशपणसमं शिशुकृच्छ्रेपि ॥ तप्तकृच्छ्रम् ॥ अत्रधेनुत्रयं अतिकृच्छ्र तप्तकृच्छ्रयोर्धेनुद्वयम् इत्येके धेनुचतुष्टयमित्येके ॥ ॥ पर्णकृच्छ्र ब्रह्मकूर्चयोः ॥ अर्द्धधेनुः अन्नहोमोप्यस्ति ॥ पराकः ॥ पञ्चधेनवः द्वेवातिस्रः षट्त्रिंशन्मते ॥ ॥ सौम्यकृच्छ्रे एकाधेनुः सान्तपने एकः पुराणः महासान्तपने धेनुद्वयम् ॥ पिपीलिकामध्ययवमध्ययोः ॥ अनयोरष्टधेनवः सवृषधेनुर्दक्षिणा सार्द्धसप्तधेनवः शूलपाणिः इदमतिधनिनः निर्धनस्य तु प्राजापत्यत्रयं यति शिशु ऋषि चान्द्रायणे ॥ धेनुचतुष्टयं धेनुत्रयमित्यन्ये ॥ १पुराण १६मासा ५वा ३ धेनुः ३६० धेनुः द्वादशवार्षिकोभवति प्रायश्चित्तं २ अब्दव्रतेधेनवः ॥ ४५ सार्द्धाब्दे ९ अब्दे १८० षडब्दे ३६ द्वादशाब्दे त्रिंशत् प्राजापत्येन एकाब्दव्रतं कथितं पंचचत्वारिंशतेनसार्द्धाब्दमेवं सर्वत्र ॥ ॥ अथपंचगव्यप्रमाणम् ॥ ॥ गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैवगोमयं पयश्च ताम्रवर्णाया रक्तायागृह्यते दधि कपिलाया घृतं ग्राह्यं सर्व्वकापिलमेव वा । मूत्रमेकपलं ग्राह्यं अंगुष्ठार्द्धं तु गोमये क्षीरं सप्तपलं ग्राह्यं दधित्रिपलमुच्यते घृतमेकपलं ग्राह्यं पलमेकं कुशोदकम् ॥

च्च गागव्या गोमूत्रमित्यादिसमंत्रकं कार्य्यं पंचगव्यपानं भो
जनस्थाने पंचगव्यपाने यमः पलाशे मध्यमेपर्णे भाण्डे ता
म्रमये तथा मृन्मयेपि इतिपंचगव्यम्॥ ॥अथपंचरत्नानि॥
॥ सुवर्णं रजतं मुक्ता लाजावर्त प्रवालकम्। कनकं कुलिशं नी
लं पद्मरागंच मौक्तिकं एतानि पंचरत्नानि रत्नशास्त्रविदोवि
दुः॥ पन्नापाची गरुड गारुत्मक कुलिशं हीरकं पद्मरागं चू
नी अभावे सर्व्वरत्नानां हेम सर्व्वत्र योजयेत्॥ ग्रहाणांरत्ना
नि॥ माणिक्यं मुक्ता प्रवालं पाचिः पुषराज हीरक नीलं गोमे
दं वैदूर्य्यं लाजवर्त॥ वैदूर्य्य वेरूज टोडरका पन्ना॥ ॥अथ
पञ्चपल्लवाः॥ अश्वत्थोदुम्बरप्लक्षचूतं न्यग्रोधपल्लवाः। प्ल
क्षपाकर चूतआम्रः न्यग्रोधौ वटः उदुम्बर गूलड॥ पञ्चामृ
तं॥ पंञ्चामृतं दधिक्षीरं सितामधुघृतं नृप॥ आज्यं क्षीरं मधु
तथा मधुरत्रयमुच्यते इति मधुत्रयम्॥ ॥अथषट्रसः॥ ॥
मधुरोः म्लश्च लवणः कषायस्तिक्त एवच॥ कटुकश्चेति राजेंद्र
रसषट्कमुदाहृतम्॥ सर्व्वौषधी॥ कुष्टं मांसं हरिद्रे द्वेमुरा
शैलेय चन्दनं॥ वचा चंपक मुस्तञ्च सर्व्वौषध्यो दश स्मृताः
॥ अथसप्तमृदः॥ गजाऽश्वरथ्यावल्मीकसंगमाद्धृदगोकुला
त्। चत्वरस्यापि इति केचित् राजद्वारतोपि॥ सप्तधातवः॥ ॥
सुवर्णरजतं ताम्रम् आरकूटं तथैवच॥ लोहं त्रपु तथा सीसं
धातवः सप्त कीर्तिताः॥ आरकूटं पित्तलं त्रपु रांगा॥ सप्तधा
न्यम्॥ यवगोधूमधान्यानि तिलाः कंगुस्तथैवच श्यामाकं
चीनकञ्चैव सप्तधान्यमुदाहृतम्। श्यामाकचीनकयोरभा
वे मुद्गमाषकयोर्ग्रहणम्॥ ॥अथसप्तदशधान्यानि॥ ॥
व्रीहयश्च यवाश्चैव गोधूमाः कंगुकास्तिलाः प्रियङ्गवः कोवि
दाराः कोरदूषाः सतीनकाः माषा मुद्गा मसूराश्च निष्पावाः स
कुलत्थकाः आढक्यश्चणकाश्चैव गणतः सप्तदश स्मृताः
इति॥ अथ अष्टादशधान्यानि॥ यवगोधूमधान्यानि तिलाः

कंगु कुलत्थकाः माषा मुद्गा मसूराश्च निष्पावाः श्यामसर्षपाः गवेधुकाश्च नीवारा आडक्योथ सतीनकाः चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु॥ ॥अथ दशविधं शाकम्॥ ॥ मूलपत्रकरीराग्र फलकाण्डाधिरूढकाः॥ त्वक्पुष्पं कवकं चेति शाकं दशविधं स्मृतम्॥ ॥अथ हविष्याणि॥ हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः माषकोद्रव गौरादीन् सर्वाभावे पि वर्जयेत्॥ अग्निपुराणे॥ व्रीहि षष्टिक मुद्गाश्च कलायाः सतिलं पयः॥ श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः॥ कूष्माण्डालाबु वार्त्ताक पालक्कीज्योत्स्निकास्त्यजेत्॥ चरुभैक्ष्यं सक्तुकणाः शाकं दधि घृतं मधु॥ श्यामाकाः शालि नीवाराः यावकं मूलतण्डुलं॥ हविष्यं व्रतनक्तादावग्निकार्यादिके हितं॥ मधुमांसं विहायान्यत् व्रते च हितमीरितम्॥ ॥तत्रैव भविष्ये॥ ॥हैमन्तिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः॥ कलायाः कंगु नीवारा वास्तूकं हिलमोचिका॥ षष्टिका कालशाकञ्च मूलकं केसु केलरत्॥ कन्दः सैन्धव सामुद्रे गव्ये च दधि सर्पिषी॥ पयोऽनुधृतसारञ्च पनसाम्रहरीतकी॥ पिप्पली जीरकश्चैव नागरंग कतिन्तिणी॥ कदली लवली धात्री फलान्यगुड मैक्षवम्॥ अतैलपक्वं मुनयो हविष्याणि प्रचक्षते॥ लवणे मधु सर्पिषीति क्वचित्पाठः॥ ॥अथ आमिषाणि॥ प्राण्यंगचूर्णं चर्मांबु जम्बीरं बीजपूरकम् अयज्ञशिष्टं माषादि यद्विप्रेरनिवेदितं॥ दग्धमन्नं मसूरञ्च मांसं चेत्यष्टधाऽमिषम्॥ ॥अथ ग्रहाणां समिधाः॥ अर्कः पलाशः खदिरः अपामार्गश्च पिप्पलः॥ उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात्॥ ॥ अथ पंचरंगाः॥ ॥ शालितंडुलचूर्णेन शुक्लं वा यवसम्भवं रक्तं कुसुमं सिन्दूरं गैरिकादि समुद्भवं॥ हरितं लोड्ढवं पीतं रजनीसम्भवन्तथा॥ कृष्णं दग्धयवैर्हेरितं पीतं कृष्ण विमिश्रकं॥ इति॥ ॥अथ शतौषधी॥ अश्मरी १ सहदेवी २ अपराजिता

३ मुंडा ४ उशीर ५ बासा ६ अधःपुष्पी ७ शंखपुष्पी ८ ज्येष्ठीमधु
९ कोरकः १० चक्रांकिता ११ विष्णुक्रांता १२ शिवक्रांता १३ मयू
रशिखा १४॥ काकजंघा १५ भृंगराज १६ कुमारी १७ हय १८ क
र्णिकार १९ अपामार्ग २० बिल्व २१ षण्मूला २२ अंबुज २३ उस
रा २४ पुत्रजीव २५ दूर्वा २६ काश २७ कुश २८ साल २९ नाल ३०
चक्रमर्द ३१ सिंही ३२ व्याघ्री ३३ अर्क ३४ प्लुक्ष ३५ पलाश ३६ पि
प्पल ३७ वट ३८ उदुंबर ३९ तुलसी ४० उत्पल ४१ शतपत्र ४२
अतसी ४३ सारिवा ४४ कदम्ब ४५ बकुल ४६ शमी ४७ राह्रिक ४८
निर्गुण्डी ४९ मुंडी ५० दण्डी ५१ ब्राह्मी ५२ अशोक ५३ सूर्यभक्ता
५४ रुद्रजटा ५५ कदली ५६ बीजपूरक ५७ मदनक ५८ मुसली ५९
पुनर्नवा ६० आम्र ६१ पाटल ६२ श्रीपर्णी ६३ करवीर ६४ चंपक ६५
गुडूची ६६ देवदारु ६७ अगरु ६८ चंदन ५९ कुटज ७० शिग्रु ७१ ह
रिद्रा ७२ जटामामी १३ वचा ७४ कुष्ट ७५ तज ७६ दारुहरिद्रा ७७ ब
न्धुजीव ७८ सिन्धुवार ७९ सटी ८० अश्वगन्धा ८१ मुस्ता ८२ कु
रण्टक ८३ पनस ८४ जीवक ८५ जाती ८६ मालती ८७ मधूक ८८
खदिर ८९ सप्तच्छद ९० शिरीष ९१ काकमाची ९२ शतावरी ९३
केतकी ९४ जंबू ९५ शाका ९६ वेतस ९७ आमलक ९८ सरल ९९
गिरिकर्णी १००॥ ॥अथशिवपूजने पुष्पाणि॥ ॥ बार्हतं क
र्णिकारञ्च करवीरं तिलस्य च ॥ बिल्वपत्रं च कल्हार मर्कमं
दारमेव च॥ मालतीचंपकं चैव तथा मोगरकं शुभम् ॥ कनकं
शतपत्रं च करवीरं तथा शुभम् ॥ जातीपाटलकं चैव पुन्नागं
च विशिष्यते॥ नीलोत्पलं च रक्तं च कमलं पद्मसंज्ञकं॥ कदंबं
च कुसुंभञ्च अशोकं बकुलं तथा॥ पालाशं मुचकुंदं च तुलसी
मल्लिका तथा॥ एतेषां लक्षपूजां वै यः करोति नरोत्तमः॥ स एव
शंकरं प्राप्य शिवेन सह मोदते॥ कामनया लक्षपुष्पार्चनम्॥
श्रीकामः बिल्वपत्रम्॥ शान्तिकामः दूर्वा॥ आयुः अर्कपुष्पैः॥
पुत्रं बार्हतैः॥ सर्वकामा चंपकैः नागकेशरैः॥ धनं बकुलैः ति

लपुष्पैः पुन्नागैश्च॥ विद्याकल्हारैः कर्णिकारैः मन्दारकुसुमैः॥ महाव्याधी पालाशैः पाटलैः कदंबैः धनं धत्तूरपुष्पैः॥ वशीकरणं सौवीरैः॥ ॥अथ वापीकूपतडागादिशुद्धिः॥॥ हारीतः॥ वापीकूपतडागेषु मानुषं यदि शीर्यते॥ अस्थिचर्म्मविनिर्मुक्तैर्दूषितं श्ववराादिभिः॥ उद्दृतं च जलं सर्वं शोधनं परिमार्जनं॥ चर्म्मनिर्मुक्तैश्चिरकालाद्विशीर्णैरित्यर्थः॥ देवलोपि उद्धरेदुदकं सर्व्वं पञ्चपिंडान् मृदस्तथेति॥ बृहस्पतिः नतु विशेषोक्तः मृतपंचनखात् कूपादत्यन्तोपहतात्तथा आपः समुद्धरेत्सर्वाः शेषं वस्त्रेण शोषयेत्॥ वन्हेः प्रज्वालनं कृत्वा कूपे पक्केष्टकाचिते पंचगव्यं न्यसेत् पश्चान्नवतोयसमुद्भवमिति स्वल्पाच्चिरकालोपहतो तु हारीतः॥ घटानां शतमुद्धृत्य पञ्चगव्यं क्षिपेत्ततः श्वभिः श्वपाकचण्डालैर्दूषितेषु विशोधनं आपस्तंबस्तु विशेषमाह उपानच्छ्लेष्मविण्मूत्रं स्त्रीरजो मद्यमेव च एभिर्विदूषिते कूपे कुंभानां षष्ठिमुद्धरेत् स्थावरजलाशयेषु कूपवदेव शुद्धिः॥ शातातपोपि॥ अन्यैरपि कृते कूपे सेतौ वाप्यादिके तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते इति॥ ॥अथ वर्षस्य षण्णवति श्राद्धमिति मिताक्षरायाम्॥ ॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात् पितृभ्यः प्रयतो मनुष्यः श्राद्धं कृतं तेन समा सहस्रं रहस्यमेतत् पितरो वदन्ति॥ इति पद्मपुराणे॥ नित्यनैमित्तिकश्राद्धादि प्रतिनिधित्वेन नित्यनैमित्तिकतर्पणं तन्त्रेण करिष्ये॥ ॥अथ बलिवैश्वम्॥ देवादियज्ञसिद्ध्यर्थे नित्यनैमित्तिकहोमे विनियोगः गायत्र्याः पंचाहुतिः सर्वेभ्यो देवेभ्यो दिवाचरेभ्यो नक्तंचरेभ्यश्च नमः बलिश्च जले स्थले वा॥ पौर्णिमायां तण्डुलदानं नित्यनैमित्तिकहोमफलम्॥ अथवा पौर्णिकामेकां कृत्वा तत्फलमश्नुते॥ तण्डुलस्य प्रदानेन सर्वयज्ञफलं लभेत्॥ अग्ने नय सुपथा इति पंचवारं जपः अग्निहोत्रफलम्। अन्यदपि जले जले न

प्रातः हवनं ओं सूर्यायस्वाहा प्रजापतये सायमपि अग्नये
स्वाहा प्रजापतये इति अग्निहोत्रम्॥ प्रणवेनचगायत्र्या केचि
न्नजुह्वंति सद्द्विजाः॥ एतौ वै सर्वदेवत्यौ एतत्परं न किंचन॥
एताभ्यांसुहुतेनैवसर्वेभ्योपिहुतंभवेत्॥ इतिपाराशरस्मृतिः
॥ अग्नेनयजपेन्मंत्रं पंचवारंदिनेदिने॥ औपासनंविनाभुंक्ते
गृहस्थस्यनकिल्बिषम्॥ ऋग्विधानेन॥ पथ्याग्नौहृदये सू
र्येस्थण्डिले प्रतिमासुच। षट्स्वेतेष हरेः सम्यक् अर्चनंमुनि
भिःस्मृतम्॥ षड्भिःसंपद्यते धर्मं ते दुर्लभतराः कलौ॥ प्रायश्चित्त
धर्म्म१ वर्णधर्म२ आश्रमधर्म३ संप्रदायधर्म्म४ नित्यधर्म ५
नैमित्तिकधर्म ६॥ अथसंप्रदायधर्म्म॥ भस्मरुद्राक्षधारणं न
मः शंभवे इति अंजलित्रयदानं त्रिकालरुद्रार्चन फलम् अभि
षेकफलंच। अधिकारार्थं प्रायश्चित्तार्थं प्रातःस्नानार्थं मध्या
न्हस्नानार्थं वा नैमित्तिकस्नानार्थं च स्नानं करिष्ये इतिपंचवार
निमज्जनं रुद्रसूक्तं जपेन्नित्यं नमः शंभवायेति रुद्रीफलं
सर्वेषामुद्यापनं पूर्णपात्रदानंगीतापाठश्च गवां कण्डूयनं गो
दानफलं गोग्रासश्च॥ काश्यांलिंगान्यनेकानि काश्यांतीर्था
न्यनेकशः॥ अकृत्वा दर्शनंस्नानं प्रायश्चित्ती भवेन्नरः॥ ॥
परिहारः॥ ॥ स्मरणाद्दर्शनात् स्पर्शादर्चनान्नमनात्स्तुतेः॥
न जातुजायतेकिंचित् कलुषस्य समुद्भवः॥ नित्यंपुराणश्रवणं
गंगास्नानं विश्वनाथानुवृत्तिः तत्ततीर्थस्नानं देवार्चनंचदानं
शक्त्यासत् कथासत् प्रसंशनं पापात्त्रासः कीर्त्तनं शंभुनाम
कुर्यादेवं क्षेत्रमध्ये स्थितानां नोचेत्तीव्राभैरवीयातना स्या
त्॥ ॥अथनित्ययात्रा॥ दंडपाणयेनमः कीर्त्तिमुखायन
मः काशीखंडोक्त गंगाविश्वेश्वरादि नित्यनैमित्तिकयात्रिय
समस्तदेवादिभ्यो नमः सर्वापराधनिवृत्तिः॥ निराधेश्वरायन
मः सायंकाले त्रिः केदारेश्वरायनमः॥ विधिपूर्वककाशीवास
फलम्॥ भैरवीनिवृत्तिः त्रिःनिवासेश्वरायनमः त्रिः अविमुक्ते

श्वराय नमः॥ ॥अथकशीवासफलम्॥ चित्रकूपाय चित्रगुप्तेश्वराय चित्रघण्टायै नमः॥ रवौ भौमे च कालभैरवाय कालकूपाय नमः॥ क्षेत्रकृतसमस्तपापभयनिवृत्तिः॥ देहाभिमाने गलिते विज्ञाते परमात्मनि॥ यत्र यत्र मनो याति तत्र तत्र समाधयः॥१॥ ॥अप् तेज वायु आकाश पृथिवी अहंकार बुद्धि अव्यक्त ज्ञानेन्द्रिय कर्मेन्द्रिय मन इन्द्रियोंके कर्म इच्छा द्वेष सुख दुःख संघात चेतना धैर्य्य आत्मा॥ ॥ ॥सत्व॥ ज्ञान धर्म्म २ रज। सुखेच्छा क्रोध लोभ ३ तम। प्रमाद आलस्य निद्रा मोह अज्ञान ५॥ जन्म मृत्यु जरा व्याधि दुःखदोषानुदर्शन। अमानित्व अदंभ अहिंसा क्षान्ति आर्जव आचार्योपदेश शौच स्थैर्य्य इन्द्रियार्थ वैराग्य ममता अहंकारः अशक्ति नित्य समचित्त इष्ट अनिष्ट उपपत्ति अनन्य भक्ति विविक्त देश सेवा अरतिर्जन संसदि अध्यात्मज्ञानार्थ तत्वज्ञान॥ ॥अनूपविलासधर्मप्रभृति स्मृत्यर्थसारव्यवस्थापत्र वृहन्मनु ब्रह्मपुराण एषाम्॥ आशौचनिश्चयः सम्यक्॥ ॥इतिमिश्रश्रीवृन्दावनसंगृहीतधर्मप्रबोधिनीसमाप्ता॥

अथधर्म्मप्रबोधिन्याःसूचीपत्रं

सूचीपत्रंसमाप्तम्